श्री रणवीर केन्द्रीय संस्कृत विद्यापीठ ग्रन्थमाला

॥ 17 ॥

शैवाचार्यो नागार्जुनः

तस्य स्तोत्रयुगलं च।

डा० बलजिन्नाथ पण्डितः

राष्ट्रिय संस्कृत संस्थानम्, नव दिल्ली

केन्द्रीय-शिक्षा-मन्त्रालयस्याङ्गभूतम्

1987

Shaivacharya Nagarjuna
and
His Two Hymns



Edited With Notes Etc.

By

Dr. B. N. Pandit

Ranvir Kendriya Sanskrit Vidyapeetha

JAMMU

Shaivacharya Nagarjuna

and

His Two Hymns

Edited With Notes, Etc.

By

Dr. B. N. Pandit

Ranvir Kendriya Sanskrit Vidyapeetha

JAMMU

श्री रणवीर केन्द्रीय संस्कृत विद्यापीठ ग्रन्थमालायाः

१७तमं कुसुमम् ।

शैवाचार्यो नागार्जुनः

तस्य स्तोत्रयुगलं च ।

डा० बलजिन्नाथ पण्डितः

प्रधानसम्पादक : डा० जगन्नाथ पाठकः, प्राचार्य

(शैवदर्शन कोषपरियोजनायाः पञ्चमोऽयं परिस्पन्दः)

राष्ट्रिय संस्कृत संस्थानम्, नवदिल्ली

(केन्द्रीय-शिक्षा-मन्त्रालयस्याङ्गभूतम्)

प्रकाशक : श्री रणवीर केन्द्रीय संस्कृत विद्यापीठं जम्मू पुरस्थम् ।

मुद्रक : आदर्श सैनिक प्रैस, जम्मू कैंट ।

प्रथम संस्करणम् : १९८७—५००

मूल्यम् : रु० 58.75

ग्रन्थस्य पुनर्मुद्रणाधिकाराः विद्यापीठायत्ताः ।

प्राक्कथनम्

नागार्जुनेति नामभाजो बहवो ग्रन्थकाराः श्रूयन्ते स्मर्यन्ते च विद्वत्समाजेषु। ते च माध्यमिक-वज्रयानरसशास्त्रादिकर्तारः। परं नागार्जुनाख्यस्य शैवदर्शनाचार्यस्य नामापि विद्वत्समाजेषु न प्रथितम्, न चापि विद्वांसस्तस्याचार्यस्य कविताया माहात्म्येन परिचिताः। विरल-विरल एव कोऽपि तयोर्माहात्म्यं जानाति।

अथास्माकं सौभाग्यमेतद् यदत्र विद्यापीठे प्राचार्यपदस्य कार्यभरोद्वहनारम्भ एव विद्यापीठीयग्रन्थमालाप्रकाशनप्रसङ्गेनास्माभिः शैवाचार्यनागार्जुनविषयोऽयं ग्रन्थ इदम्प्रथमतया प्रकाशनायोपात्तः इति।

अत्र ग्रन्थे नागार्जुनस्यास्य विशेषपरिचयः, देशकालविचारणा, स्तोत्रद्वयस्य प्रस्तुतिः, स्तोत्रयोः संस्कृतव्याख्या, हिन्दीभाषानुवादो नागार्जुनस्य काश्मीरशैवदर्शनानुसारित्वं चेति बहवो विषयाः शोधानुकूलया दृष्ट्या निबद्धा इति बहुजनहितकारित्वमस्य प्रकृतस्य ग्रन्थस्य। ग्रन्थारम्भे च या शोधात्मिका विवेचना सातीव महिममण्डिता। ग्रन्थनिर्मातारश्च काश्मीरशैवदर्शनस्य विशेषज्ञा भारतराष्ट्रपतिसम्मानिता विद्वांसो विद्यापीठाङ्गभूतायाः शैवदर्शनकोषपरियोजनाया निदेशका डा० बलजिन्नाथपण्डिताः।

नागार्जुनस्य यच्छैवं स्तोत्रद्वयमत्र ग्रन्थे प्रकाश्यते, तदतीव सरसं, सालङ्कारं, भावगाम्भीर्यमण्डितं, शब्दार्थोभयसौन्दर्यप्रकर्षसुशोभितं च। नैतत् केवलं स्तोत्रकाव्यमेव, अपितु शैवदर्शनरहस्यगर्भत्वेनैतच्छास्त्रेष्वपि गणयितुं शक्यम्।

श्री-रणवीर-केन्द्रीय-संस्कृतविद्यापीठस्य सौभाग्यमेतद् यदीदृशस्य दार्शनिकस्तोत्रद्वयस्य सटीकं शोधपूर्णं च प्रख्यापनं नातिप्रथितस्य च महामाहेश्वराचार्यस्य नागार्जुनस्य कवेर्यशःप्रसारणमधुना विधीयत इति धन्यमिदं विद्यापीठं धन्याश्च वयं सर्वेऽस्य विद्यापीठस्याङ्गभूताः अधिकारिजनाः इति।

डा० जगन्नाथपाठकः
प्राचार्यः
श्रीरणवीरकेन्द्रीय संस्कृत विद्यापीठस्य,
जम्मू पुरस्थस्य

जम्मू पूरम्
19-6-1987

प्रास्ताविकम्

महामाहेश्वराचार्यस्य सिद्धनागार्जुनस्य विषये ग्रन्थोऽयं मया द्वादशवर्षाणि प्राक् शिमलानगर्यां लिखितमभूत्। परं प्रकाशनस्य प्रबन्धः सुचिरं नैव समभवत्। 1983 तमे खृ॰स्ते वत्सरे तत्रभवद्भी राष्ट्रियसंस्कृतसंस्थानस्य निदेशकपदवीमधिरूढैर्गुणैकपक्षपातिभिराजीवनं च संस्कृतवाङ्मयसेवापरैः डॉक्टर—श्रीमण्डनमिश्रमहाभागैरस्मत्कृते ग्रन्थप्रकाशनमार्गोऽनुकूलतां नीत इति त एवास्मिन् महामहिमशालिनि कार्ये भूरिशो धन्यवादानर्हन्ति। जम्मूपुरे मुद्रणकलाया दारिद्र्यवशाददन्यैश्च कैश्चन कारणैः प्रकाशनकार्यमस्मत्परियोजनाया मन्दयैव गत्या प्राचलत्।

1986 तमस्य वर्षस्य पूर्वभागे एव प्रस्तुतं मया वर्तमानस्य ग्रन्थस्य प्रकाशनम्। अग्रे सौभाग्यवशाद्वर्तमानैः प्राचार्यमहोदयैर्गृहीताधिकारैरेव सहर्षं मुद्रणमस्य समादिष्टम्।

ग्रन्थोऽयं न केवलं सिद्धस्य महामाहेश्वरस्याचार्यनागार्जुनस्य यशः प्रख्यापयिष्यति, अपि त्वेकतः सहृदयानां विदुषां चेतांस्याह्लादयिष्यत्यपरतश्च शैवदर्शनरसिकानां हृदयकमलान्यपि विकासयिष्यतीत्याशास्महे।

अत्र सम्पादनकर्मणि साहाय्यकर्तारोऽस्मच्छोधपरियोजनायां कार्यरताः शोधसहायाः धन्यवादार्हाः। प्राचार्यमहोदयाः डा० श्रीजगन्नाथपाठका अपि भूरिशो धन्यवादार्हाः यैः सहर्षं सत्वरं च ग्रन्थस्य प्रकाशनं समादिष्टं मुद्रणस्य च प्रबन्धः कृतः। सर्वाधिकं धन्यवादार्हाः एवंविधकार्यजातप्रोत्साहनरसिकाः संस्कृत संस्थानस्य निदेशकमहोदयाः डा० श्रीमण्डनमिश्रमहाभागाः।

डा० बलजिन्नाथपण्डितः
शोधनिदेशकः
शैवदर्शनकोष—परियोजनायाः
श्रीरणवीर केन्द्रीय-संस्कृतविद्यापीठस्य

जम्मू पुरम्
18-6-1987

प्रकरणोल्लास

PREFACE

A smali book on Saivacharya Nagarjuma was composed by me a few years back. Sanction for its Publication by Ranvir Kendriya Sanskrit Vidyupeetha, Jammu was sought for some time in 1982. It did not come for a long time till the matter came to the notice of Dr. Mandana Mishra, the present Director of the Rashtriya Sanskrit Samsthan. He found the work quite interesting and accorded the sanction without delay in 1983. *Bhrngisasamhita*, a voluminous *Tirtha-mahatmya*, was lying in the press at that time. It was therefore decided that the publication of the book on Nagrajuna along with three other small books, edited by the members of the staff on the Saivadarsana Kosa Project and sanctined for publication by the Vidyapeetha, be taken up in the next financial year. *Svatantryta-darpana* by Dr. B. N. Pandit was published in 1984-85. Its publication was followed by that of a Fasciule of the Encyclopaedia of Kashmir Saivism in 1985-86. Now comes the turn of Saivacarya Nagarjum for publication in 1986-87.

Dr. Mandana Mishra, the Director of the Samsthan, deserves thanks for his keen interest and proper encouragement in such research oriented publication work taken up by the Vidyayeetha. Dr. Jagannatha Pathaka, the Principal of the Vidyappeetha also deserves thanks for providing facilities for such literacy work. Dr. D. N. Shastri, helped me in preparing the press copy of the work in hrnd and Dr. Brajnandan Sharma and Dr. Girija Sharma rendered help in proof reading with keen interest. I am thankful to all these scholars,

Detailed information about the manuscripts and transcripts used by me in editing the present work is being given in its Introductory Chapter. As for the source of the transcript used by the inmates of

the ashrma of Swami Vidyadhara at Srinagar in publishing the 2nd edition of the two religo-philosophic hymns by Nagarjuna, I made recently one more enquiry and came to know the same fact that Swami ji heard some Pandit at Ganesh-pura (near Pahalgam) chanting the hymns in a temple. Becoming highly interested in them on account of their poetic and Philosophic value, he got a transcript prepared by the Pandit concerned for him and imparted its copies to his disciples at Srinagar. Later they published the hymns after the Swami had left this mortal world. The history of the other sources of the copies of the hymns is given in detail in the introductary Chapter.

Jammu
Dated 15-7 1985

B.N. Pandit

विषय-सूची

1.	The Poet	1
2.	शैवाचार्यो नागार्जुनः	17
3.	परमार्चनत्रिंशिका	33
4.	चित्तसन्तोषत्रिंशिका	75
5.	काश्मीरशैवत्वं ग्रन्थकर्तुः	113
6.	श्लोकानुक्रमणी परमार्चनत्रिंशिकायाः	125
7.	श्लोकानुक्रमणी चित्तसन्तोषत्रिंशिकायाः	127
8.	ग्रन्थसङ्केत सूचिः	129
9.	समुद्धृतग्रन्थवाक्यसूचिः	130
10.	शुद्धिपत्रम् ।	131

विषय-सूची

1. Introduction 1
2. 12
3. 33
4. 35
5. 113
6. 125
7. 127
8. 129
9. 130
10. 131

THE POET

Several great persons under the name Nagarjuna have appeared in India. The most prominent one among them is the famous teacher and great author of the Madhyamika school of Buddhism. He belonged to the South and lived some where near the present Nagarjuna Kaunda, though Kalhana mentions him as a Bodhisattra residing at *Sadarhadvana*, the modern Harvan a place situated at the foot of the mountain named *Tripuresadri*(Zabarvan) rising on the eastern bank of of Dal lake. The place is a few miles to the east of Srinagar. It is just possible that the famous Buddhist philosopher of the South, having come to Kashmir on the occasion of the fourth Buddhist conference held in the valley during the reign of Kaniska in the 2nd century A D., may have established a hermitage at Harvan as well where he may have lived for a considerable time. That hermitage may have afterwards been known as *Sadarhadvana*, the forest of Buddhist monks who may have been six in number. Kalhana may have mentioned such traditional name of the hermitage as mentioned above.

One more ancient Nagarjuna is well known in Kashmirian folk lore. He is populary called "Nagiray", that is "Nagaraja" and poets writing in Kashmirian language mention him as "Nagi-arzun" that is, Nagarjuna, as well. He was a youth of some Naga tribe, living in a hilly area of Kashmir near the modern town named Shopayan and is said to have possessed certain wonderfull supernatural powers. Kashmirian poetry presents him both as a human being as well as a snake-god. That is in fact the local belief about snake gods. Nagas may have originally been some mountain dwellers residing in the hills of Kashmir before its colonization by Aryans under the leadership of Karyapa, They may have been snake worshippers in faith and may therefore have been known as Nagas. The Naga prince fell in love

with a beautiful Aryan girl named Himal who was living in the same area. The long story of their mutual love, full of ups and downs and tragic and comic events, has all along remained popular with the writer, singers and listeners of Kashmirian poetry. There are several poets of Kashmirian language who have chosen the story of Nagiray and Himal for writing beautiful lyrical love poetry which is even now sung and listend by Kashmirian folk. One of such poem is mixed with Persian passages as well and depicts the romantic story through the medium of beautiful poetry. That poem mentions the hero under the name Nagi-arzun.

Another ancient Nagarjuna, known in both Indian and Tibbetan traditions, is some sorceror possessing wonderful powers and knowing the use of wonderful medicines that can keep a person alive and young for extraordinarily long ages. Many works on Indian medicine have been connected with his name. Some of them are:- Yogasara Rasaratnakara, Rasasarga, Yogaratnamala, Yogaratnavali, Nagarjuniya etc. Cakrepani a 10th century author of medicine mentions two prepartions under the name of Nagarjuna in his Cikitsa samgraha. No meaningful research has so for been done on this wonderful teacher of medicine. His wonderful medicines could save a person from old age and even from death according to traditions. Acharya Govinda, the traditional preceptor of Sankaracharya, is said to be ever young and youthful and Madhavacarya of the fourteenth century included such medical science among the schools of Indian philosophy and named it Rasesvara-darsana.

The Vajrayanina Nagarjuna is generally identified by the Tibbetan Budbhists with the Madhyamika philosopher, but these were definitely two different well known teachers. Matryendranatha, a Tantric teachers of Saktism, enjoying great reputation as a Kaula yogin appeared in Assam sometime in the early centuries of the Christian era. He is being taken as the founder of the Kaula system of Tantrism in this age of *Kali*. That system is said to have been started by four *Yugenathas* in four yugas and they are respectively Khagendranatha, Kurmanatha

Mesanatha and Matsyendranatha who gave fresh start to the practical teachings of the Kaulic Tantrism in different ages. Saraha, alias Rahulabhadra, a Buddhist monk of the Vijnanavada school, learnt Kaulism from some efficient teacher belonging to the line of Matsyendranatha. He adapted it very wisely to the fundamental Principles of Vijnanavada and presented it efficiently as a secret *sadhana* taught by Buddhism. He eliminated cleverly two very important principles of Kaula Saktism for such purpose. One of these is the principle of the existence of a constant entity called atman (a soul) lying beyond one's mind and directing it as well as all other senses and organs in their functions. The other principle of Kaulism eliminated by him is the principle of absolute theism. Besides, he changed the names of all the Tantric deities so as to make them look like Buddhist ones and gave all the philosophic terms a Buddhist colouring. Thus he presented Saktism of the Kaula system of Matsyendranatha as mystic Buddhism and gave it the name "Vajrayana.' One of his very efficient disciples was a monk named Nagarjuna who also is, many a time, being wrongly identified with the ancient Madhyamika philospher of the South by the Lamas of Tibbet and Mangolia. He popularized among Buddhist monks such Tantrism which passed on under the name of Vajrayana Budhhism. He possessed wonderful powers developed through the practice of Tantrism. Padmasambhava, a disciple in his line, carried such Tantric Buddhism to Tibbet and from there it spread to many countries of the Buddhist world. It is now known as Lamaism and is still living in Tibbet, Mangolia, Luddakh, Sikkim, Bhutan and at places in Nepal. One of its main centres has been recently established by Dalai Lama at Dharmsala.

Three more authors under the name Nagarjuna are known to us : (*a*) One of them is the author of a Dharmasastra the manuscript of which lies in a library at Tanjaur. (*b*) Another one is a Tantric author

who wrote Nagarjuna Tantra. (c) The third one is Siddha Nagarjuna, the author of Ascarya-ratna-mala etc. It is yet to be decided by means of meaningful research whether any of these Nagarjunas can be identified with any of the above mentioned authors of the same name.

There has been one more Nagarjuna who is being introduced to our readers through the work in hand. He is neither any hero of any romantic love-poetry, nor any sorcerer nor physician but a great philosopher of superior merit moving in the higher plains of intuitional revelation. Unlike the Madhyamika teacher, his method is not of logical thinking, but of direct intuitive experience. Madhyamika Buddhism can lead an aspirant to such a higher stage in the state of dreamless sleep where all knowing and doing, knower and doer, means of knowing and doing as well as their objects become fully absorbed in the static and tranquil psychic light of consciousness and nothing remains either of subject or of object or of the psychic or physical means of knowing and doing. What remains there is only the simple and static flux of pure and momentary consciousness, freed from all types of misery. Such a state of perfect rest comes close to the position of vacuum. But Nagarjuna, who is presently being introduced to thinkers, is a philosopher who teaches to realize the self, through the psychic light of its own consciousness, as the source and the base of all phenomena and to realize it as the great God playing divinely through all the creations, dissolutions etc. He teaches to see everything as one's infinitely blissful self and to transcend not only the relative pair of pleasure and pain but even that of bondage and liberation. Thus he leads an aspirant beyond even the finest step in the state of dreamless sleep and provides such bounties of blissfulness as can be tasted charmingly at the higher steps of *Turya*, the fourth state of animation, the state of intuitional self-revelation. The two small works of this Nagarjuna reveal him to be much more advanced in intuitional

experiences in the field of higher spiritual philosophy than even the two great Buddhist philosophers of the same name. If the Madhymika Nagarjuna is highly advanced in logical thinking, this Saiva Nagarjuna is much more definite about the exact nature of the absolute reality. If the Vajrayanin teacher is impatient to impress upon people the effects of his sorcery, this philosopher of higher merit tastes an extreme type of self-satisfaction in the sweetest charms of the direct realization of his pure and divinely potent infinite I—consciousness. The colophons of his two small works say him to be a *Mahamahesvara*, that is, a great Saiva philosopher of high merit. The contents of his works do definitely confirm such fact about him and he can be classed with the greatest teachers of Saiva monism.

Two small works of this Saiva Nagarjuna, which are available at present, appeared twice in print at Srinagar during the last three decades and yet he is very little known even in Kashmir. He is still less known in other parts of India and hardly some one may be knowing him outside India. But, since his works are of a high merit from both the view points of philosophy and poetry, he deserves to be brought to light before the scholars of the world. Mahesvarananda is the only ancient author who quotes from one of his works without mentioning his name. No other author of Indian philosophy has mentioned him though he deserves to be well known to all the Samskritists in the world. Therefore this booklet on him is being edited for publication by the Ranvir Kendriya Samskrit Vidyapeetha, Jammu, run by the Rashtriya Samskrit Samsthan. The two small works by the author, along with Samskrit commentaries and Hindi translations are also being published in this booklet.

The two poems of this Mahesvara Nagarjuna can be classed with the best specimens of religio-philosophic lyric poetry. The philosophic principles and the doctrines of theology of this Nagarjuna agree fully

with those of Kashmir Saivism. It is a wonder that quotations from them have not been given in any ancient work on Saivism composed in Kashmir. The poet philosopher must therefore belong to a later age. To which place did he belong, is also a riddle. He must have been dwelling at some place near Kashmir because : (1) His views on phiiosophy and theology agree with those of the authors of Kashmir Saivism. (2) His works have been discovered in Kashmir. (3) He has been quoted by Mahesvarananda who was very well acquinted with the works written by Kashmirian authors. But these things can not be any decisive proofs to prove his place of habitation. He can have belonged to any place in South, in Himachal, in Assam or in any other part of India. Though the philosophy of monistic Saivism developed in Kashmir, yet some of its authors and great teachers lived in other parts of India as well. Mahesvarananda lived in Chola in the far South. Sumatinatha lived in Andra Pradesh, Sambhunatha in Kangara and nothing can be said definitely about the place where Punyanandanatha and Amrtanandanatha lived. Therefore the problem regarding the exact place to which this Saiva Nagarjuna belonged cannot be definitely solved on only such feeble surmise as mentioned above. Recently I went through the diaries of the roamings of my preceptor, Acharya Amrtavagbhava. At two places he writes that he went to see three sacred places round about the present jwalamukhi temple and those places are the shrines of Siddha Nagarjuna, Ambikes'-vara and Kapisthala. On making an enquiry from a few people belonging to that area, I came to know that the sacred place of Siddha Nagarjuna is situated about a mile above the temple of Sri Jawala-mukhi on the slope of the same hill. Sambhunatha, one of the preceptors of Abhinavagupta, lived definitely at Kangra and Jwala-mukhi is not very far away from there. The lines of his disciples may have continued to flourish in the area and Nagarjuna may have appeared in one of such lines. The present sacred place of Siddha-Nagarjuna may have most probably been the place of this Mahamahes-

vara Nagarjuna. It is therefore he who is known there as Siddha Nagarjuna. Since Sambhunatha has been described by Abhinavagupta as *Trikarthambhodhi--candramah*, this Nagarjuna also became a successful master of the Trika sadhana which fact becomes quite evident if one reads carefully his two *stotras* which are being published in this small book. Had this Nagarjuna been a Kashmirian, his fame would have spread since long in the Valley and outside it as well, because he could not have remained in oblivion in Kashmir where people would have highly appreciated his poems. But since he was not sufficiently known in Kashmir till the recent times, he must have belonged to some other place which is most probably the place known as Siddha Nagarjuna in Himachal Pradesh. As for the problem regarding the exact time of this Saiva Nagarjuna, it appears that it may not have been earlier than the time of some very well-read authors of Saivism, e.g., Utpala-Vaisnava, Ksemaraja and Jayaratha because they have not at all quoted anything from any of his works even when the works of these three writers serve as the store-houses of information regarding the prominent authors and important works on Saiva philosophy. Mahartha-manjari Parimala is the only such important ancient work which quotes a verse from one of his poems. Its author, Mahesvaranda, belonged to the 14th century and this Siddha Nagarjuna may have flourished about the thirteenth century A.D.

Saivism developed in several schools of philosophy. But the views of Nagarjuna agree only with those of Kashmir Saivism. He does not aim at Siva-bhoga of the Saiva Siddhanta, nor does he give importance to its *carya* and *kriya*. His philosophy, as revealed in his poems, does not advocate the *Lingayata* path of Vira Saivism, nor does it praise either the torturing or the rediculous theological activities of Lakulisa Pasupata school. Unlike the Sivadvaita shool of Srikantha,

it does not aim finally at any type of *Sayuja* but at a self experience of one's own divine nature of absolute and monistic Godhead even in this mortal life and there it agrees fully with Kashmir Saivism. Even in his theological views regarding *Parapuja*, the poet shows himself as an ardent practitioner of the Trika system of practical Saivism. This fact strengthens further to some extent the view that he may have been an adept aspirant in the line of Sambhunatha. He is, no doubt, an Advaitin, but there is no trace of the *Vivartavada* of Advaita Vedanta in his poems which prove him to have been an ardent believer in theism which he has depicted as the essential nature of the monistic absolute reality. He does not advocate the *Mayavada* of Sankara but preaches *Lilavada* of Kashmir Saivism.

His two available works are :—

(1) Paramarcanatrimsika : It is a devotional philosophic lyric containing thirtyone stanzas, twenty nine in *Rathoddhata* metre, the thirtieth in *Vasantatilaka* and the concluding one in *Anustubh*. It describes several aspects of *Parapuja* as taught in monistic Saivism. Many of its stanzas can be compared with passages from many philosophic and theological works by some great authors of Kashmir Saivism. Some of such parallel passages are being quoted along with Samskrit explanation in Chapter V of the work in hand.

(2) Citta-santosa-trinsika : This lyrical poem also contains thirtyone stanzas, twentynine in *Vasantatilaka* metre, thirtieth in *Harini* (हरिणी) and the concluding one as an *Anustubh* verse. The poet draws comparison between his two psychic states ; the state of ignorance and bondage and the state of correct knowledge and liberation in this very mortal life. The view points of a bonded ignorant being and a liberated person possessing the correct knowledge have been mutually compared in beautiful poetic style in this work.

Both the poems are highly emotional in character and are very effective in arousing emotions in a reader. Their language is simple and style is free from poetic elaboration. The principles and doctrines expressed in them through the medium of beautiful poetry are very often much more effective than those expressed in philosophical treatises through the medium of subtle and turse logic. Many other merits of these two poems can be instinctively experienced by readers themseives when they read and understand them.

These two poems of Saiva Nagarjuna were copied by me in early forties at Martand (Mattan), Kashmir. Dr. S.N. Tikku, a scholar with a keen interest in the ancient history of Kashmir, possessed their transcripts which he had copied out in *Devanagari* from some *Sarada* manuscript obtained for such purpose by Dr. K.C. Panday when he was doing research on Kashmir Saivism at Srinagar. In late forties I got a few copies written out by Shri Nathji Gadu of Sathu, Srinagar and distributed them among some aged persons interested in Saivism. Later Dr. R.K. Kaw got a copy from Siva Nath Sharma who had obtained it from D.N. Variku. and published both the hymns in 1960 in his Saradapeeth Reseach Series journal. Both the hymns were afterwards reprinted by the workers of the Saiva Ashrama of Swami Vidyadhara at Karannagar, Srinagar. But these editions of the two works do not contain any satisfactory research study on this Saiva Nagarjuna, nor do these bear any commentary or translation.

In May, 1984, I went to Srinagar and searched out the Sarada manuscripts of the two hymns at the Govt Research Library which is at present being looked after by Kashmir University and is kept there in its big library building. Pt. Dina nath Yaksa, Shastri, helped me in tracing them out and in comparing them with my own transcript.

The transcript copied out by me at Mattan contained many mistakes commited by scribes though some gross ones among them were already eliminated from it by Dr. Tikku. I had already studied them deeply and made necessary corrections in the light of Sanskrit grammar, Indian prosody and the principles of Saiva monism. The Sarada manuscripts also were found to be immensely incorrect. Therefore I used my own above mentioned transcript, copied and corrected by me, as the base for the publication of the present edition. Variations in the text have been noted below each page as foot notes and the sources of such variety in the text have been noted down as given below :

(*i*) My own Devenagari transcrit=क.

(*ii*) Saradspeetha Research Series edition=ख.

(*iii*) S. Vidyadhara Asrama edition=ग.

(*iv*) Sarada manuscript in the Research Library at Kashmir University=घ.

A Sanskrit commentary for the use of Sanskrit scholars has now been added to these two religio-philosophic lyrics and the present edition contains their Hindi translation as well. That has been added for the benefit of common people who may make use of them in their religious activities. It may help others as well.

The Sanskrit commentary can fully justify the corrections made by me in my own transcript. Necessary appendices have also been added to the present edition.

———

शैवाचार्यो नागार्जुनः

विद्वाँसस्तावत् प्रसिद्धं माध्यमिकदर्शनकारं बौद्धं नागार्जुनं सम्यग् विजानन्ति सर्वत्रात्र भुवने। केचिच्च रससिद्धमपि कञ्चन नागार्जुनं जानन्ति। केऽपि द्वयोस्तयोरैक्यं मन्यन्ते। तिब्बतदेशीयासु परम्परास्वपि कस्यचन सुप्रसिद्धस्य नागार्जुनस्य कीर्तिः श्रूयते। तत्रापि केचिन् माध्यमिकेनाचार्येण सह तस्यैकीभावं विदधति।

काश्मीरेष्वस्माभिर्महामाहेश्वराचार्यस्य कस्यापि नागार्जुनस्य कृतिरत्नद्वयमुपलब्धं मार्त्तण्डपुर्याम्।

तत्र कोऽयं नागार्जुन इति प्रश्ने सत्येवमुच्यतेऽस्माभिः—वस्तुतोऽनेका अभूवन् नागार्जुननामान आचार्याः। तेषां पृथक्-पृथक् परिचयश्च यथालब्धोऽत्र दीयते मनाक्—

(१) माध्यमिककारिकादिनिर्माता सुप्रसिद्धो नागार्जुनस्तावत्कनिष्कसमकालिकः। दाक्षिणात्योऽसौ बौद्धयोगीति निश्चितं विदुषां मतम्। तत्र नागार्जुनकौण्डाख्यं यदद्यापि प्रसिद्धं स्थानमस्ति तत्समीपे तस्याश्रमोऽभवत्।

कनिष्कस्य कालस्य विषयेऽपीतिहासविदां मतद्वयम्। केचित्तस्य कालं ख्रैस्तशकात् प्राक्तने प्रथमे शतके मन्यन्ते, अपरेषां मते तस्य कालः ख्रैस्तप्रथमशताब्दीति वा द्वितीयेति वा। असौ माध्यमिकबौद्धशास्त्रस्य गुरुरिति नात्र कोऽपि संशयः।

(२) राजतरङ्गिण्यां कल्हणेनोक्तं यत्षडर्हद्वनस्थाने नागार्जुनो नाम बोधिसत्त्वोऽभूत् कनिष्कस्य शासनकाले। तदुक्तं तत्र—

बोधिसत्त्वश्च देशेऽस्मिन्नेको भूमीश्वरोऽभवत्।
स च नागार्जुनः श्रीमान् षडर्हद्वनसंश्रयी॥
(रा. त. १-१७३)

अस्तीदानीं डलनामकस्य ह्रदस्य प्रागुत्तरकोणस्थे तटे शालमारनामकं प्रसिद्धमुद्यानम्। ततः कतिपयक्रोशमार्गे प्रागुत्तरस्यामेव दिशि स्थानमेकमद्यापि "हारवन" इति नाम्ना ख्यातं वर्तते। तत्र पुरातत्त्वान्वेषकैराश्रमकल्पस्यावासजातस्य भग्नावशेषा अपि खनित्वा प्रकटीकृताः वर्तन्ते। ततः सम्यगनुमीयते यदिदं "हारवन" इति स्थानमेव कल्हणकविना षडर्हद्वन इति नाम्नोल्लिखितम्। तदत्र विषये वर्तते समस्यैका—किमत्रत्यो नागार्जुनोऽन्यो, दाक्षिणात्यश्चापरः, अथवा किं दाक्षिणात्यस्यैव बौद्धगुरोरिदमपरमाश्रमपदं यत् कल्हणेन प्रशस्तम्। अत्रानुमातुं शक्यते यद्बौद्धानां यच्चतुर्थं महासम्मेलनं कश्मीरमण्डले कुण्डलवनविहारेऽभवत् कनिष्कस्य शासनकाले तत्रैव निजज्ञानप्रकाशनार्थमागतः सन् दाक्षिणात्यो नागार्जुनोऽस्य देशस्य रमणीयतयाऽऽकृष्टश्चात्राप्याश्रमनिर्माणं विधायोषितवान् पर्याप्तं कालमिति। तदाश्रिता या जनश्रुतिः कल्हणस्य कर्णगोचरतां याता तामेवाश्रित्य तेन षडर्हद्वनसंश्रयिणो बोधिसत्त्वस्य नागार्जुनस्य गुणकीर्त्तनं कृतमिति। ततो नासौ षडर्हद्वनसंश्रयी नागार्जुनो दाक्षिणात्यान्नागार्जुनाद्भिन्न इति स एवायं माध्यमिकशास्त्रनिर्माता कश्मीरेष्वपि प्रसिद्धिमुपागत इति।

(३) अपरोऽपि कश्चन नागार्जुनो यो भारतीय-तिब्बतीय-

जनश्रुतिषु प्रसिद्धः स रससिद्धः कश्चन विविधालौकिकसिद्धिमान् महापुरुषः। लिखिते वाङ्मये तद्विषयकः कोऽपि प्रामाणिक इतिहासो नैव क्वापि लभ्यते। परमनेके ग्रन्थास्तत्कृतत्वेन प्रसिद्धाः। ते च यथा योगसारः, रसरत्नाकरः, रससर्गः, योगरत्नमाला, योगरत्नावलिः, लघुरत्नावलिः, नागार्जुनीयम् इति। १०शमशताब्द्यां चक्रपाणिना निर्मिते चिकित्सासङ्ग्रहे नागार्जुनयोग इति नागार्जुनाभ्रकमिति चौषधद्वयं संगृहीतं वर्तते। अस्य रससिद्धस्य नागार्जुनस्य चिकित्सापद्धतिर्जनमजमरमरञ्च विधातुमलमिति श्रूयते। श्रीशङ्कराचार्यस्य गुरुर्गोविन्दो भगवान् नित्यषोडशवर्षीय इति श्रूयते। सोऽयं महिमा रससिद्धेः। तत एव माधवाचार्येण सर्वदर्शनसङ्ग्रहे-रसेश्वरदर्शनमपि संगृहीतम्।

(४) तिब्बतदेशे मङ्गोलियादेशे च वर्तमानेऽपि युगे प्रचलति लामाधर्माख्यो वज्रयानाभिधो बौद्धधर्मः। तस्य शाखाविशेषे यस्य सिद्धस्य गुरोर्नागार्जुनस्य प्रसिद्धिरसौ वज्रयानधर्मस्य भारतीयः कोऽप्याचार्यः सप्तमशताब्दिप्राये कालेऽविर्बभूव। तस्य यद्दर्शनं तत्तु-बौद्धदर्शनशाखान्तरनाम्ना प्रसिद्धमपि वस्तुतस्तान्त्रिकं दर्शनम्।

तदनुयायिनः भूयांसः लामाधर्मचारिणः सिक्किमभूटानराज्ययोः नेपालदेशेऽपि च क्वचित् क्वचिन्निवसन्ति। कामरूपदेशे ख्रैस्तशकस्य प्रारम्भिकासु शताब्दीषु कदाचित् प्रादुर्बभूव शाक्तः सिद्धः श्रीमत्स्येन्द्रनाथो यस्य पौराणिकगाथातुल्याः जन्मगाथाः भारते तिब्बतदेशे चाद्यापि प्रवर्तन्ते जनश्रुतिषु, तदाधारे लिखितेषु च पुस्तकेषु। आचार्याभिनवगुप्त महोदयस्तं "मच्छन्द" इति सुप्रसिद्धेन देशभाषामयेनैव नाम्ना उल्लिखँस्तं भक्त्या प्रणमति तन्त्रालोकारम्भे। शाक्तसम्प्रदायस्य ये चतुर्षु युगेषु प्रवर्तका गुरवस्तेषु चतुर्थोऽयं

गुरुर्येन कौलाचारनामा शाक्तो भोगमोक्षप्रद उपासनाक्रमः कलौ युगे प्रवर्तितः। तस्य परम्परा कामरूपे कामाख्यानाम्नि पीठे विशेषतः प्रचलिता। कदाचित् तत्परम्पराधीशस्य कस्यापि तन्त्रविद्यागुरोः सकाशाद् राहुलभद्रापरनाम्ना शरहाख्येन बौद्धभिक्षुणापि कौलिकी साधना तान्त्रिकी च दर्शनविद्या सम्यग् सुभृशं गृहीते। उभयं च गृहीत्वा सम्यक् चाभ्यस्य, तत्र साफल्यं चावाप्य तेन बौद्धदर्शनस्य विज्ञानवादस्य नीतिमनुसरता तस्याः तन्त्रविद्यायास्तथा प्रकाशनं कृतं यथा विज्ञानपरम्परातिरिक्तस्य स्थिरस्य प्रमातृरूपस्यात्मनः सत्तायाः, जगत्सञ्चालकस्य च परमेश्वरस्य सत्ताया उल्लेखो मनागपि तत्र नागतो, यथा च तद्दर्शनमापाततो बौद्धदर्शनमिव प्रतीतमभूत्। तस्यैव सौगतवेषेण प्रच्छन्नस्य कौलदर्शनस्य वज्रयानमिति नाम प्रसिद्धिमगात्। तथाविधानां केषामपि तान्त्रिकाणां सिद्धान्तानां प्रवेशो बौद्धदर्शनपरम्परासु राहुलभद्रात् पूर्वमपि क्रमशः समभवदिति धर्मकीर्तिग्रन्थानामध्ययनेन प्रतीयते। परं वज्रयानाख्यस्य गृहीतबौद्धाकारस्य कौलदर्शनस्य सुविकासः शरहाख्यस्य भिक्षुवरस्यैव प्रयत्नेन समभवत्। वज्रयानगुरुषु यः प्रसिद्धतमो गुरुर्यस्य च कीर्तिस्तारनाथप्रभृतिभिस्तिब्बतीयलेखकैर्गीतास्ति स्वग्रन्थेष्वसौ गुरुरस्य राहुलभद्रस्य शिष्यो नागार्जुनो यं तारनाथादयो लेखका सत्यमितिहासतत्त्वमजानन्तः प्रसिद्धं माध्यमिकमाचार्यमेव मन्यन्तेस्म। अस्यैव शिष्यपरम्परायां प्रादुरभूत् कालान्तरे पद्मसम्भवो नाम तान्त्रिकबौद्धधर्मगुरुर्यस्तिब्बतदेशं गत्वा स्वकीयतान्त्रिकसिद्धीनां बलेन तत्रत्यान् मन्त्रोपासकान् धर्मगुरून् सम्यग्विजित्य तत्र वज्रयानाख्यं तान्त्रिकं बौद्धधर्मं प्रवर्तितवान्। तत एव भिक्षूणां सिद्धिजालप्रभावतो वज्रयानस्य प्रभावः सुविशालेषु

चीनप्रभृतिषु देशेषु प्रसृतः, इदानीमपि च मङ्गोलियादेशेऽक्षुण्ण-स्तिष्ठति। तदिदं तावन्निश्चितत्वेन ज्ञेयं यद् बौद्धगुरुषु प्रथमो नागार्जुनो दाक्षिणात्यो गुरुर्माध्यमिककारिकादिनिर्माता प्रसिद्धो दर्शनाचार्यो, द्वितीयश्च कौलसम्प्रदायपक्षपाती तान्त्रिकस्य वज्रयानाख्यस्य बौद्धसम्प्रदायस्य विकासकोऽसावाचार्यो यस्तिब्बतीय-लिखितपरम्परानुसारं गुह्यसमाजतन्त्रस्य व्याख्याकारः, यस्य चाश्रमो दक्षिणे देशे श्रीशैलसमीपे क्वापि बभूव, यस्यैव च शिष्यः प्रसिद्धस्तिलोपा नाम सिद्धपुरुषः इति। तास्तिब्बतीयाः परम्पराः कियतांशेन प्रामाणिकाः इति पूर्वमेवोक्तम्। ततः श्रीशैलवासी नागार्जुनोऽन्योऽयं च तान्त्रिको बौद्धगुरुरन्यः, इति न भ्रमितव्यं तयोर्नामसादृश्येन। श्रीशैलवासिनो नागार्जुनस्य प्रामाणिकः कोऽपीतिहासो नैव लभ्यते। अग्रेवर्णयिष्यमाणः शैवो नागार्जुनः कदाचिच्छ्रीशैलेऽप्युषितवान् कञ्चित् कालमिति कल्पना विधातुं शक्यते, यतो लोकपरम्परा न सर्वथा निराधारा भवन्ति।

(५) अथ कश्मीरदेशे काश्मीरभाषाकाव्येषु जनश्रुति-परम्परासु च प्रसिद्धोऽपरोऽपि नागार्जुनो यो नैव माध्यमिक-शास्त्राचार्यो नापि वज्रयानगुरुर्न चापि रससिद्धः कश्चन यतिर्नैवापि कोऽपि ग्रन्थकर्ता, अपितु नागजातीयः कोऽपि लोककथानायको यं काश्मीरभाषायां "नागिराय" इति कथयन्ति। "नागिराय" इति शब्दः संस्कृतपदस्य "नागराजः" इत्यस्यापभ्रंशात्मकः काश्मीर-भाषाशब्दः। कश्मीरेष्वन्येष्वपि सुप्रभूतेषु देशेषु नागपूजा प्राचीनेषु युगेषु लोकप्रियाभूत्, इदानीमपि बहुधा जानपदेषु लोकेषु प्रचल-त्येव बहुषु स्थानेषु, कश्मीरेष्वन्येषु हिमालयीयोपत्यकास्थलेषु

विशेषतः । तदमी नागाः कथासु सर्पाकारा अपि प्रसिद्धा मानवाकारा अपि च । पौराणिकास्वपि गाथासु तथैव गीता बहुशः । इयं काश्मीरभाषालोककथापि तथैव प्रसृता । नागाः अत्र सर्पाकारा अपि मानवाकारा अपि च मन्यन्ते, गण्यन्ते च देवयोनिमध्ये । ततः स्वेच्छातः मानवीयं सार्पं वा देहं धारयितुं समर्था इति जनानां विश्वासः ।

काश्मीरगाथानायकस्यास्य नागराजस्य कैरपि भाषाकविभिर्लिखिताः काव्यात्मिकाः कथाः कश्मीरेषु मुद्रिता लभ्यन्ते । तासां मध्ये एका काश्मीर-पारसीकभाषाद्वयमिश्रा कथा यस्यां नागराजोऽसौ "नाग्य-अर्जुन" इतिनाम्नाप्युक्तः । एतच्च नाम संस्कृतभाषामयस्य नागार्जुन इति पदस्य काश्मीरभाषामयमपभ्रंशरूपं पदम् । एवं मन्यते तावदितिहासविशेषज्ञैः कश्मीरमण्डले यत् कथानायकोऽयं नागार्जुनो नागपूजकानां मूलनिवासिनां मध्ये कस्यापि राजवंशस्य कुमारो योऽतीव रूपवान् गुणवानैश्वर्यवांश्चाप्यभूत् । शुपयनसमीपे क्वचित् पर्वतोपत्यकास्थलेऽस्य राज्यं गृहञ्चासीत् । ततः कतिपयक्रोशदूर एवाभूत् कस्यचिदुपनिविष्टस्य भारतीयस्यार्यमहानुभावस्य काचनातिसुन्दरा कन्या "हीमाल" इति नाम्नी । तयोरेव पारस्परिकस्य विरह-मिलन-विघ्न-तत्प्रशमनादिवृत्तान्तबहुलस्य पर्यन्ते च विपदपाकरणेन सुसफलीभूतस्य प्रेम्णो या गाथा सैव बहुधा कश्मीरभाषाकविभिः सुगीता सती सुप्रसिद्धा, लोकप्रिया च । तत् कश्मीरेष्वयं कथानायकोऽत्र पञ्चमो नागार्जुनः ।

(६) तञ्जौरनगर्य्यां क्वापि पुस्तकालये नागार्जुनकृतं धर्मशास्त्रं सुरक्षितं वर्तते । तस्य विशेषशोधकार्यं नाद्यापि केनापि

कृतम्। तदयं नागार्जुनः प्राग्वर्णितेभ्यो नागार्जुनेभ्यो भिन्नो वाऽभिन्न एव वेति नेदानीं निश्चेतुं शक्यते। तदयं षष्ठो नागार्जुनः।

(७) अपरोऽपि कश्चन तान्त्रिको नागार्जुनः श्रूयते "नागार्जुनतन्त्रम्" यत्कृतं मन्यते जनैः। सोऽयं वज्रयानीयान्नागार्जुनाद् भिन्नो वाऽभिन्नो वेति नैव निश्चेतुं शक्यमुपलब्धसामग्र्याधारे। अस्मद्विचारेणायं वज्रयानीयो नागार्जुन एव वा भवितुमर्हति, सिद्धनागार्जुनो वाऽग्रेऽभिधास्यमानः। सोऽयं सप्तमो नागार्जुनः।

(८) आसीत् कोऽपि सिद्धनागार्जुनो "येनाश्चर्यरत्नमाला, योगरत्नावलिः, लघुयोगरत्नमाला च निर्मिताः। अस्मद्विचारानुसारमयं नागार्जुन एव तान्त्रिको नागार्जुनः, स एव चाग्रेऽभिधास्यमानो ग्रन्थेऽत्र मुख्यतया वर्णयिष्यमाणश्च महामाहेश्वरो नागार्जुनः। अयं तावदष्टमो नागार्जुनः।

(९) उपरि गणितानामष्टानामपि नागार्जुनानामपक्षेयातितरां महिममण्डितो योऽत्रापरो नागार्जुनोऽसावतीवोत्कृष्टः शैवसिद्धः सन्नपि नैव सम्यक् प्रसिद्धः। केचन विरलविरला एव विद्यावन्तस्तस्य माहात्म्यं जानन्ति। सामान्यजनास्तस्य नाम्नापि न परिचिताः। प्राचीनेषु संस्कृतग्रन्थेष्वपि तस्य नाम प्रायो न लभ्यते क्वापि। अद्यावधि मयैकमेव पुस्तकं दृष्टं यस्मिंस्तस्य कृतेरेकं पद्यमुद्धृतमस्ति। तत्र ग्रन्थस्य नामार्चनात्रिंशिकेति दत्तमस्ति, परमाचार्यस्य नामकीर्तनं नैव कृतं वर्तते। तच्च पुस्तकं महेश्वरानन्दस्य "महार्थमञ्जरीपरिमलः" इति। उक्तंहि तत्र यदुक्तमर्चनात्रिंशिकायाम्—

बालिका-रचित-वस्त्र-पुत्रिका-
क्रीडितेन सदृशं तदर्चनम् ।
यत्र शाम्यति मनो न निर्मलं
स्फीतचिज्जलधिमध्यमाश्रितम् ॥

(म० मं० प०, पृ० १०८)

अनेनैतज्ज्ञायते यन्महेश्वरानन्दात् प्राक्तनोऽयं शैवो नागार्जुनः । शैवग्रन्थानां शैवाचार्याणां चेतिहासस्य ये निधयस्ते तावत् (१) उत्पलवैष्णवकृता स्पन्दप्रदीपिका (२) जयरथकृतस्तन्त्रालोकविवेकः, (३) महेश्वरानन्दकृतः महार्थमञ्जरीपरिमलः, (४) अमृतानन्दकृता योगिनीहृदयदीपिका चेति । प्रथमं निधि द्वयं तु क्रमेण दशमे द्वादशे च शतके आविर्भूतम्, अपरञ्च द्वयं त्रयोदशचतुर्दशशतकप्राये काले । यतः—उत्पलवैष्णवेन जयरथेन च नागार्जुनस्यास्य तत्कृतयोः स्तोत्रयोर्वा न कोऽप्युल्लेखः क्वापि कृतो विद्यमानेऽपि तयोः सुमहति शास्त्रीये माहात्म्ये, ततोऽनुमातुं शक्यं यदयं शैवो नागार्जुनो जयरथादर्वाक्तनो महेश्वरानन्दाच्च प्राक्तनः । ततस्त्रयोदशे खैस्ताब्दशतकेऽस्य स्थितिरिति कुशकाशावलम्बनेनानुमानेन मनाक् सिद्ध्यति ।

कुत्रत्योऽयं शैवशास्त्रगुरुरित्यपि निःशङ्कतया सम्यङ् नैव निश्चेतुं शक्यम् । अस्य नागार्जुनस्य यत् कृतिद्वयं वर्तते तस्योपलब्धिः कश्मीरेषु सञ्जाता, नान्यत्र क्वापि । एतेन केचन शैवगुरुमिमं काश्मीरिकमेव मन्यन्ते । अस्य काव्यद्वेय येऽपि दर्शनसिद्धान्ता याश्चापि साधनाप्रक्रियास्तेषां तासां चैकवाक्यता काश्मीरशैवदर्शनसिद्धान्तैः काश्मीरकस्य च त्रिकयोगस्य प्रक्रियाभिरेव वरी-

वर्ति । तदनेनाप्ययमाचार्यः काश्मीरिक एवेति केचन मन्यन्ते । भारतीयेषु प्राचीनेषु विद्वत्सु ग्रन्थकारेषु च केवलं महेश्वरानन्द एवास्य कृतिभिः परिचितः । स च महेश्वरानन्दः काश्मीरिकाणां विदुषां ग्रन्थान् सुबहूनधीतवानिति तत्कृतस्य महार्थमञ्जरीपरिमलस्याध्ययनेन विज्ञायते । ततः काश्मीरविदुषां ग्रन्थैः सम्यक् परिचितो महेश्वरानन्दोऽस्य शैवाचार्यस्य नागार्जुनस्य ग्रन्थं जानातीत्यनेन कुशकाशावलम्बनकल्पेनाश्रयेणैतन्मनागनुमिन्वन्ति केऽपि यदयं नागार्जुनोऽपि काश्मीरिक एवेति । परमेतन्नैवैतैर्हेतुभिर्निःशङ्कतया प्रतिपादयितुं शक्यम् । दाक्षिणात्यस्य धर्माचार्यस्य पञ्चस्तवी कश्मीरेष्वतितरां लोकप्रिया । तस्य मातृकाः कश्मीरेषु बहुसंख्याकाः सुलभाः । काश्मीरशैवदर्शनस्यैकवाक्यता महार्थमञ्जर्यादिभिरपि वर्तते, सौभाग्यभास्करेणापि भास्करराययकृतेन । परं न महेश्वरान्दो न वा भास्कररायः काश्मीरकौ । काश्मीरकस्य शैवशास्त्रगुरोरभिनवगुप्ताचार्यस्य यो ज्ञानविज्ञानपारिपूर्ण्यप्रदो गुरुरसौ काङ्गड़ामण्डलस्थस्य जालन्धरपाठस्याधीशः श्रीशम्भुनाथः । श्रीशम्भुनाथेऽप्यनुग्रहशक्तिपातकृद् गुरुर्दीक्षिणात्यः श्रीशैलवासी श्रीसुमतिनाथः । ततो न निश्चप्रचमत्र विषये किमपि वक्तुं शक्यम् । एवंविधैव स्थितिः पुण्यानन्दनाथस्यामृतानन्दनाथस्य च विषये ।

अथाद्यत्व एव मया पूज्यस्य स्वगुरोरमृतवाग्भवाचार्यस्य पर्यटनवृत्तान्तदर्शिका दैनन्दिनी पठिता कापि । तस्यां तैः कांगड़ामण्डले ज्वालामुखीमन्दिरस्य नातिदूरे त्रयाणां देवस्थानानां दर्शनस्योल्लेखो द्विवारं कृतः । तानि च स्थानानि (१) सिद्धनागार्जुन-

स्थानम् (२) अम्बिकेश्वरस्थानम्, (३) कपिस्थलस्थानञ्चेति । अथ मया तदनन्तरं तद्देशनिवासिनः केचन सज्जनाः पृष्टाः । विज्ञातं च तेभ्यो मया यच्छ्रीज्वालामुखीमन्दिरात् क्रोशमात्रदूरे स्थले तस्यैव शैलस्योपरितने भागे वर्तते सिद्धनागार्जुनस्थानं यत्र मन्दिरे भैरवमूर्त्तिः पुरतश्च स्थण्डिलं वर्तते इति । तेन सुकरमिदमनुमानं यत् कांगड़ामण्डले प्रचलितायां सिद्धश्रीशम्भुनाथपरम्पराया-माविर्भूतोऽयं महामाहेश्वरो नागार्जुनो, असावेव च तान्त्रिको नागार्जुनोऽपि, सिद्धनागार्जुनोऽपि च यावुपरि निर्दिष्टौ । ज्वाला-मुखीशैले च तस्यैव नागार्जुनस्याभ्यासस्थानं यत्राद्ययावद् भैर-वमूर्तिः पूज्यते इति । सिद्धशम्भुनाथं वर्णयताऽभिनवगुप्ताचार्येण "त्रिकार्थाम्बोधिचन्द्रमाः" इति विशेषणं प्रयुक्तं तन्त्रालोके । नागा-र्जुनस्यास्य स्तोत्रयोरध्ययनेनास्य त्रिकयोगसिद्धता स्पष्टीभवति । श्रीशम्भुनाथोऽपि महामाहेश्वरः, अयं नागार्जुनोऽपि तथा । उभौ पराद्वैतसिद्धान्तनिष्ठावुभौ सिद्धिसम्पन्नौ साक्षात् कृतस्वात्म-महेश्वराद्वैतभावौ । तस्मात्कांगड़ामण्डले सिद्धनागार्जुनस्थाने निवासी महामाहेश्वरोऽयं नागार्जुनः श्रेष्ठस्तन्नामाऽऽचार्यः। सिद्ध-शम्भुनाथस्य कालो दशमो शताब्दी । अस्य नागार्जुनस्य च त्रयोदशी भवितुमर्हति । अस्य काश्मीरकत्वं नैव निश्चेतुं शक्यम् । चेदयं काश्मीरकोऽभविष्यत्तदा चिरादसौ विद्वत्समाजे सुप्रसिद्धिमाप्त-वानभविष्यद्, अस्य च स्तोत्रद्वयं पञ्चस्तवीवदतीवलोकप्रियता-माप्तमभविष्यत् कश्मीरमण्डले, तत्रत्यानां जनानां रसिकत्वाद् वैदुष्याभिनन्दकत्वाच्च । परं वर्तमानं युगं यावदस्य नामापि कश्मीरेषु विद्वत्समाजे नैवाश्रूयत । केवलं दैवयोगतः मातृकैका श्रीनगर्यामपरा च गणेशपुरेऽलभ्यत । अस्य काश्मीरकत्वे सति

चिरादयं प्रसिद्धिमगमिष्यत् । ततः कांगड़ामण्डलीय एवायं न काश्मीरक इति मे विचारः ।

अस्य शैवस्य नागार्जुनस्य कृतिद्वयमेव लभ्यते । उभयञ्च दर्शनतत्त्वगर्भं भावपरिपूर्णम्, प्रसादगुणमण्डितम्, अलङ्कारैरलङ्कृतमौचित्यानुकूलपद-रचना-छन्दः-प्रयोग-सुन्दरमतीव मनोरमम्, स्तोत्ररूपखण्डकाव्यात्मकम् । उभयं त्रिंशच्छ्लोकात्मकमेकत्रिंशेन चानुष्टुभा निगमितम् । तयोरेकं काव्यं 'परमार्चनत्रिंशिका' । एषा रथोद्धताछन्दोमयी । त्रिंशत्तमं पद्यमत्र वसन्ततिलकावृत्तात्मकम् । अस्यां त्रिकसाधनप्रक्रियायां प्रसिद्धायाः परायाः पूजायाः अङ्गप्रत्यङ्गानां, फलानां, तदभ्यासावाप्तानां दार्शनिकदृष्टीनां तदङ्गभूतस्य भावनाभ्यासस्य, तन्महिम्नः, इतराभ्यः पूजाविधिभ्यस्तस्याः वैशिष्ट्यस्य, इत्येवं प्रायाणां बहूनामुपयोगिनां वस्तूनां प्रतिपादनं सुललितया काव्यशैल्या कृतं वर्तते । अपरं च काव्यं 'चित्तसन्तोषत्रिंशिकेति' । अत्रैकोनत्रिंशत्पद्यानि वसन्ततिलकावृत्तात्मकानि । त्रिंशञ्च पद्यं हरिणीवृत्तमयम् । तदपरञ्चानुष्टुभात्मकम् । एतस्यां त्रिंशिकायां कविः स्वात्मप्रत्यभिज्ञायाः विमर्शस्य साधनभूतं स्वं चित्तं वर्धापयति । बन्धदशायां या चित्तस्य स्थितिस्तस्यास्तुलनां मोक्षदशान्वितस्य चित्तस्य स्थित्या साकं विविधैः प्रकारैः विविधाभिर्मनोहराभिः कवित्वमयीभिः कल्पनाभिरतिरमणीयेन प्रकारेणातीवचमत्कारकारिण्या कलया करोति कविपुङ्गवोऽयम् । लघुकायमपि काव्यद्वयमेतदस्य शैवस्य महाकवेर्महाकवित्वं सम्यक् प्रख्यापयितुमलमस्ति । अत्र काव्यद्वये न केवलं कवित्वचमत्कारकृतमेव माहात्म्यम् ; अपितु अतीव सुमनोरमं

दर्शनशास्त्रत्वमप्यत्र सुतरामभिव्यक्तं भवति । याः सूक्ष्मतरा योग-साधनप्रक्रियाक्रमास्तथैवंविधाः ये दर्शनसिद्धान्तास्तर्ककर्कशया शैल्या दर्शनग्रन्थेषु सुतरां प्रतिपादिताः सन्तोऽपि चित्ते नैव सम्यङ् निविशन्ते तेऽत्र काव्यद्वये कवित्वशैल्या अभिव्यज्यमानाः सन्तः कान्तोपदेशसम्मिततया जनस्य हृदयङ्गमीभावमासादयन्ति विना-यासातङ्कम् ।

पूर्वैरपि शैवदर्शनगुरुभिर्दर्शनशास्त्रसिद्धान्ता योगसाधन-प्रक्रियाश्च सहृदय-रसिक-भक्तजनोपकृतये कविताया माध्यमेनोप-दिष्टा भूरिशः । तद्यथा-प्रथमतस्तावदागमतत्त्वोपदेष्ट्रा भगवता दुर्वाससा स्तोत्रत्रयं विरचितं यदद्ययावदप्युपलभ्यते । तच्च स्तोत्रत्रयम्—(१) परशम्भुमहिम्नस्तवः, (२) त्रिपुरामहिमस्तोत्रम्, (३) ललितास्तवरत्नञ्चेति । सैषा काव्यमयी कृतिराद्यस्याद्वैतशैव-दर्शनगुरोः । ततो भट्टनारायणस्य "स्तवचिन्तामणिः" । भट्ट-प्रद्युम्नस्य "तत्त्वगर्भस्तोत्रम्" यस्य पद्यानि ग्रन्थविशेषटीकासु तत्र तत्र लभ्यन्ते । तत उत्पलदेवाचार्यस्य "शिवस्तोत्रावलि"--र्याऽद्यापि काश्मीरकेषु शैवेषु लोकप्रिया सती प्रचलत्येव । ततःशम्भुनाथापर-नाम्नः सिद्धनाथस्य "क्रमस्तोत्रम्", कालिदासापरनाम्नः श्रीवत्स-कवे-"श्चिद्गगनचन्द्रिका" । तदनन्तरमाचार्याभिनवगुप्तस्य "भैरव-स्तोत्र-क्रमस्तोत्रादीनि ।

शाखान्तरस्थानामपि शैवशाक्ताचार्याणां स्तोत्राणि बहूनि लभ्यन्ते । तद्यथा धर्माचार्यस्य "पञ्चस्तवी", गौडपादाचार्यस्य "सुभगोदयस्तुतिः" शङ्कराचार्यस्य "सौन्दर्यलहरी", जगद्धरभट्टस्य "स्तुतिकुसुमाञ्जलिः" । एवंविधानि बहूनि स्तोत्राणि संस्कृत-

वाङ्मये लभ्यन्ते यानि बहुधा शास्त्रतत्त्वगर्भाणि। एवमेवास्य शैवाचार्यस्य नागार्जुनस्योपरिनिर्दिष्टं स्तोत्रद्वयं काव्यमपि शास्त्रमपि चोभयरूपतया शोभमानं वर्तते, सन्तोषयति च तर्कहेवाकिनो विदुषः, सहृदयांश्च काव्यकलारसिकान् सममेव।

एतत स्तोत्रद्वयं मया कश्मीरदेशे मार्तण्डपुरे डा० श्रीनाथ-तिक्कू महोदयस्य विदुषो गृहे तैरेव स्वहस्तलिखितं लब्धम्। तैश्च बाल्ये श्रीनगरे कस्माच्चिच्छारदापाण्डुलिपेरिदं नागर्य्यां लिप्यामवतारितमभूत्। असौ मूलभूता शारदामातृका कुत्र वर्तते इदानीमिति न ज्ञायते मया। अनुमातुं शक्यते यत् काश्मीर-सर्वकारीयशोधसंस्थानस्य काश्मीरविश्वविद्यालये न्यस्तस्य मातृका-संग्रहे या शारदालिपिमयी स्तोत्रयोर्मातृका सैवासौ भवेदिति। ततश्चत्वारिंशद्वर्षप्रायः कालो यातो यदा मयैतयोः स्तोत्रयोः प्रतिलिपिर्मार्तण्डपुरे लिखिताऽभूत्। तदनन्तरं मया १९४८ तमे खैस्ते हायने श्रीनगरे शैवशास्त्ररतो वृद्धो "नाथजी गाडू" स्तोत्र-द्वयस्यापि कतिपयप्रतिलिपिलेखनाय प्रेरितो, दत्ता च तस्मै निजा प्रतिलिपिः कतिपयदिवसार्थम्। ततो बहुभिस्तयोर्लिप्यन्तराणि गृहीतानि शैवशास्त्ररसिकैः। १९६०तमे खैस्ते वर्षे डा० राधाकृष्ण-कावमहोदयेन प्रकाशितमुभयमपि श्रीनगरे "Sharada-Peetha Research Series" इत्याख्यायां पत्रिकायाम्। तदनन्तरं श्रीविद्याधर-स्वामिनः शैवाश्रमेण पुनः प्रकाशितमेतत् स्तोत्रद्वयं स्तोत्रसङ्ग्रहे। तच्च मया द्वादशवर्षपूर्वं कस्यापि गृहे दिल्ल्यां दृष्टमभूत्। इदानी-मुभयं मत्सकाशे वर्तते।

अतीते मईमासे श्रीनगरं यदाऽहं गतस्तदा मया तत्र काश्मीर-

विश्वविद्यालयस्य बृहत्पुस्तकालये संरक्षणार्थं न्यस्तः काश्मीरसर्वकारीयस्य रिसर्चविभागस्य पुस्तकसङ्ग्रहो मातृकासङ्ग्रहोऽपि चान्विष्टः, तत्र संस्कृतमातृकासङ्ग्रहाधिकारिणां श्रीदीनानाथयक्षाणां शास्त्रिवर्याणां साहाय्येन मया द्वयोरपि त्रिंशिकयोः शारदालिपिमय्यौ मातृके दृष्टे । तयोः पाठो बहुषु स्थानेषु दोषबहुलो दृष्टः, ततः श्रीदीनानाथशास्त्रिणामेव सहयोगेन मया तयोर्विद्यमानाः पाठभेदा अपि संलिखिताः । तेषामुपयोगोऽत्र संस्करणे विधीयते ।

अतीवमहिममण्डितमपि शैवस्तोत्रद्वयमेतत् कश्मीरेष्वपि नातिप्रथितम् । कश्मीरबाह्येषु प्रदेशेषु विरलविरलानामेव केषाञ्चिद् विदुषां परिचयो भवेदनेन स्तोत्ररत्नद्वयेन । प्राचीनेऽपि काले नैव सुविदितमभूदिदं काव्यद्वयम्, यतो महेश्वरानन्दं विहाय न केनापि प्राचीनेन रत्नज्ञेनास्य रत्नद्वयस्य परिचयः कथमपि प्रदत्तोऽस्ति । तदयं महामाहेश्वराचार्यो नागार्जुनोऽस्य च स्तोत्ररत्नद्वयमेतत् सुसमीचीनां योग्यां च ख्यातिमर्हन्ति । अच्चास्य काव्यद्वयस्य मुद्रितं संस्करणद्वयं लभ्यते, तत्र द्वितीये संस्करणे नागार्जुनस्य विषये न कोऽपि शोधमयो विचारः कृतोऽस्ति । प्रथमे च कृतोऽप्यसौ नैव प्रामाणिके क्वाप्याधारे प्रतिष्ठितः सन्नैव सन्तोषकारी विदुषाम् । ततोऽस्य नागार्जुनस्य विषये प्रामाणिक्याः शोधोचितविचारमय्याः विवेचनायाः परमाऽवश्यकता विद्यते । तामेव पूरयितुमेतत् संस्करणं प्रकाश्यते । ततो राष्ट्रियसंस्कृतसंस्थानेन जम्मूस्थे रणवीरकेन्द्रीयसंस्कृतविद्यापीठे संस्थापिते शैवदर्शनकेन्द्रेऽस्याभिनवं प्रकाशनं विधीयते । एतस्य प्रकाशनस्य विषये संस्थानस्य निदेशकमहोदयाः डा० श्रीमण्डनमिश्रमहाभागा अतीव समुत्सुकाः । तेषां सत्प्रेरणया प्रोत्साहनेन च कार्यमिदं सत्वरं प्रारब्धं शैवदर्शनकेन्द्रेण ।

स्तोत्रेऽत्र [शास्त्ररहस्यानि] सुगुम्फितानीति तानि स्पष्टीकर्तुमत्र संस्कृतवाङ्मयी व्याख्यापि विरचिता वर्तते। एतेन सुकुमारमतीनां पाठकानां कश्चनोपकारः स्यादित्याशास्यते। स्तोत्रपाठं कुर्वतामुपासकानामुपकृतये हिन्दीभाषानुवादोऽपि तत्र तत्र श्लोकानां दीयते येनार्थविचारपुरस्सरं स्तोत्रपाठं कुर्वतां तेषां चित्तं सुसन्तुष्टं भवेदिति।

इदानीं मत्सकाशे स्तोत्रद्वयस्यापि (१) शारदापीठसीरीज़द्वारा प्रकाशितं संस्करणम्, (२) श्रीविद्याधरस्वामिनामाश्रमेण प्रकाशितं संस्करणम्. (३) स्वयं लिखिता शोधिता च प्रतिलिपि : (४) शारदामातृकाभ्यामुद्धृताः पाठभेदाः, इत्येवंभूतानि सम्पादनसाधनानि वर्तन्ते। सम्पादनस्य प्रकाशनस्य चाधारतया मया स्वयं लिखिता संशोधिता च प्रतिलिपिरेव समाश्रिता। अन्यासां मुद्रिता-मुद्रितानां पुस्तकानामाधारेण पाठभेदः प्रतिपृष्ठमधष्टिप्पणीरूपतया प्रदत्तो वर्तते। स्वयं लिखितायाः प्रतिलिपेः सम्यक् संशोधनं मया पूर्वमेव यथाशास्त्रं कृतमभूदतोऽसावेवाधारीकृताऽधुना मया। टिप्पण्यां दत्तानां पाठभेदानां क्रमस्तावदेषः

१.	स्वलिखिता मूलप्रतिलिपिः	क इति
२.	शारदापीठसीरीज़संस्करणम्	ख इति
३.	श्रीविद्याधरस्वाम्याश्रमसंस्करणम्	ग इति
४.	रिसर्चविभागीये पाण्डुलिपिसङ्ग्रहे वर्तमाना मातृका	घ इति

यश्चासौ रिसर्चविभागीयो मातृकासङ्ग्रहोऽसाविदानीं सुरक्षार्थं काश्मीरविश्वविद्यालयस्य बृहत्पुस्तकालये मातृकासंग्रह-

कक्षे विद्यते । तत एवासौ स्तोत्रद्वयमातृका द्रष्टुं शक्यते सुधीभिः ।

किञ्च प्रतीयते एवं यन्मूलमातृकातः प्रतिलिपिं लिखद्भिरपि डा० श्रीनाथशास्त्रिभिः क्वचित् क्वचिल्लेखकप्रमादानां संशोधनं कृतमिति । यतो शारदालिपिमय्यां मूलमातृकायां ते प्रमादाः भूयांसः । सम्भाव्यमेतद् यत् प्राक्तनैः प्रतिलिपिलेखकैः कापि शुद्धतरा मातृका समाश्रिता भवेत्, येदानीं नैव लभ्या क्वचिदपि । ततो शास्त्रानुसारं संशोधनं यदस्माभिः कृतं तन्न्याय्यमेवेति सहन्तां शोधविद्वांसः ।

उपरितनं सर्वं विषयकदम्बकं लेखबद्धं कृत्वा पश्चान्मया श्रीविद्याधरस्वामिनः कोऽपि सन्ततसन्निकर्बभाग् वृद्धः शिष्यो दैवयोगाद् दृष्टः । श्रीविद्याधरस्वामिभिः कुतः स्तोत्रद्वयमेतत् प्राप्तमिति पृष्टे मया कथितं तेन यत् कदाचिन्मार्तण्ड पुर परिसरे परिव्रजन्तः स्वामिपादाः कञ्चित् कालं गणेशपुरे ग्रामेऽतिष्ठन् । तत्र तैर्देवमन्दिरे स्तोत्रद्वयमतेद् गायन् कोऽपि विप्रो दृष्टः । शास्त्ररहस्यगर्भं स्तोत्रयुगलस्यास्य तात्पर्यमवबुध्य तस्माद् विप्रात्तैरस्य प्रतिलिपिर्महताऽऽदरेण सङ्गृहीता, श्री नगरस्थे च निजे आश्रमे स्तोत्रसङ्ग्रहमध्ये संगृहीता । एतेनास्य स्तोत्ररत्न-द्वयस्य प्रचारः कपूमीरमण्डले ग्रामेष्वप्यभवत् कदाचिदिति प्रतीयते ।

———

परमार्चनत्रिंशिका

प्रतिमादिपूजामेव साधारणो जनोऽर्चनं मन्यते। तत उत्तरमर्चनं जपाद्यभ्यासः। तदूर्ध्वं ध्यानधारणाद्यभ्यास एव लोके परमर्चनं मन्यते। सांख्ययोगवैष्णवद्वैतशैवादिशास्त्रेषु तत उत्तरस्य न कस्याप्यर्चनस्य प्रख्यातिः। केचनोत्कृष्टास्तत्रत्याः साधकाः मानसमेव यदर्चनमुत्कृष्टं वदन्ति, तदपि ध्यानधारणाप्रकारविशेषतां नातिशेते। परमद्वैतनिष्ठाः शाक्ताः, शैवाश्च ध्यानधारणादिकं क्रियायोगे गणयन्तस्तदुत्तरं शाक्तोपायात्मकं ज्ञानयोगरूपमर्चनं गुणवत्तरमाहुः। ज्ञानयोगरूपमर्चनं तावद् भावनात्मकम्। तदनुसारं सर्वमपि जगत् स्वात्मैवेति भावनया कल्प्यते। सर्वथा यथार्थस्य वस्तुनः कल्पनात्मकं यत् सविकल्पं ज्ञानं तस्यैव नैरन्तर्येणाभ्यासस्तावद् भावनाभ्यासः। तेन भावनाभ्यासेन तद् यथार्थं ज्ञानं सुदृढेन संस्कारेण स्वात्मनि परिपक्वतया संस्काररूपेण कीलितमिव सम्भवति। यथाहि जनस्य स्वनामविषये, निजमातृपित्रादिविषये च न कदाचन काचन शङ्का समुदेति, तत् संस्कारस्य स्वबुद्धौ कीलितत्वात्, तथैव भावनाभ्यासपरिपक्वतायां निश्चलोऽयं सत्यतत्त्वनिश्चयो भवति—"यदहमेव सर्वं, मय्येव सर्वं, मत्त एव सर्वं, ममैव सर्वं, मद्विलासत एवेदम्, सर्वमित्यादि" तदयमीदृशो भावनाभ्यास एव परापूजाऽद्वैतशैवशाक्तानां सिद्धानाम्। अस्यां पूजायां सर्वं स्वात्मपरमेश्वररूपमेव दृष्टं सदानन्दचमत्कारचर्वमामेवा-

पादयति तथाविधस्य पूजकस्य । उक्तं तावदुत्पलदेवाचार्येणैतां परां पूजामधिकृत्य निजे सङ्ग्रहस्तोत्रे—

ध्यायते तदनु दृश्यते ततः स्पृश्यते च परमेश्वरः स्वयम् ।
यत्र पूजनमहोत्सवः स मे सर्वदाऽस्तु भवतोऽनुभावतः ॥

(शि० स्तो० १३—६)

सर्वदेत्यनेन सर्वस्मिन् लोकशास्त्रसम्बन्धिन्यशुद्धे शुद्धे च व्यवहारे स्वात्मशिवभावदर्शनमेव पूजनमित्यभिप्रायो ग्रन्थकृतः ।

एषा शुद्धविकल्पज्ञानाभ्यासमयी पूजैव परिपक्वतायां निर्विकल्पस्वात्मशिवभावसाक्षात्कारतामुपयाति । असौ साक्षात्कृतिः शाम्भवसमावेश इति प्रसिद्धाऽद्वैतशैवशास्त्रे । तस्याः शाम्भव्याः साधनायाः अभ्यासस्तावत्परादपि परमर्चनं शैवशाक्तसिद्धानां परम्परासु प्रवर्तमानम् । उक्तञ्चात एव विज्ञानभैरवे—

पूजा नाम न पुष्पाद्यैर्या मतिः क्रियते दृढा ।
निर्विकल्पे परे व्योम्नि सा पूजा ह्यादरालयः ॥

(वि० भै० १४७)

इति

तदेवंविधायाः शाक्तशाम्भवसाधनारूपायाः परायाः पूजायाः विषये निर्मितमेतत् स्तोत्रकाव्यं नागार्जुनेन शैवेन कविना । तत्र प्रथमे पद्ये तावदपरायाः परायाश्च पूजायाः यत्परस्परमन्तरं तस्य निर्देशं कुर्वन् प्रकृतकाव्यनिर्माणं प्रतिजानीते महाकविः—

स्नानपूजनसमाधिभिः[1] क्रमाद्
यन्महात्मभिरवाप्यते पदम् ।
कैश्चिदक्रमत एव यन्मया
तत् समर्चनमिषेण कथ्यते ॥१॥

---

१. जपादिभिः—(घ)

कोई महानुभाव स्नान, पूजन, समाधि आदि साधनों के क्रम से किसी पद को (क्रम से ही) और कोई और तो अक्रम से ही (उत्कृष्टतर) पद को पाते हैं। तो मैं विना क्रम के परम पद को पाने वालों की उस साधना को इस पूजावर्णन रूपी कविता के माध्यम से कह रहा हूं।

कैश्चिच्छ्रौत-स्मार्त-वैष्णव-सांख्य-योगादि-धर्मपरायणैः स्नान-पूजनसमाधिप्रभृतिभिरुपायैर्यत् पदं (तैर्महात्मभिः) क्रमेणावाप्यते, स्नानपूजनादेरष्टाङ्गयोगाभ्यासादेश्च सर्वस्य क्रियात्मकत्वेन क्रम-रूपता, क्रमरूपतायाः क्रियाहृदयत्वात्, क्रमात्मतां विहाय न क्रियायाः कोऽप्यवभासः कथञ्चिदपि। ततोऽवरकोटिकाणवोपायत्वं वा, तदुपायशेषभूतत्वं वा स्नानपूजनादीनाम्। तदुत्तरवर्त्ती तावच्छा-क्तोपायः, शाक्तादप्युत्कृष्टः शाम्भवः। उभयमप्येतत्क्रमरहितम्। ज्ञानस्याक्रमत्वं हि नियतक्रमरहितत्वम्, बीजज्ञानात् पूर्वमप्यङ्कुर-ज्ञानं, ततोऽपि पूर्वं वृक्षज्ञानम्, तस्मादपि पूर्वं पत्रपुष्पफलादिज्ञानं सम्भवतीति नात्र नियतः क्रमः। लौकिक्यामिच्छायामपि तथैव। परं पारमेश्वरी या परमेश्वरतामयी स्वशक्त्यभिव्यक्त्युन्मुखेच्छा तस्यां तु नियतस्य वाऽनियतस्य वा क्रमस्य नैवावभासः कोऽपि। तस्याः क्रमोल्लासकमूलस्पन्दात्मकत्वात्। ततः शाक्तशाम्भव-योगात्मक-ज्ञानेच्छोपायनिष्ठैरक्रमत एव परशिवात्मकं पदं सद्य एवावाप्यते। तदेषा या परापूजा तया यत् पदमक्रमत एव सिद्धैः प्राप्यते, तदेव मयाऽनेनार्चनविषयेण काव्येन वर्ण्यते।

किञ्च एकतः क्रियोपायभूतानां लौकिकानां मोक्षोपायाना-मपरतश्च शाक्तशाम्भवात्मकानां परापूजास्वरूपाणां ज्ञानेच्छा-

मयानामुपायानां परस्परतुलनात्मकवर्णनमनेन शास्त्रतत्त्वगर्भेण काव्येन कविना विधास्यत इति तस्य प्रतिज्ञा। तदेवोक्तं सर्व-मुपरिनिर्दिष्टं समर्चनमिषेणेति-सम्यगर्चनं समर्चनं, परापूजात्मकं यत्तस्य मिषेण व्याजेन कथ्यते कविनेति।

अथापरया रथोद्धतया मनसो नैर्मल्यावाप्तिपूर्वकं लय एव परपूजायामावश्यकः, तद्विना नासौ परापूजेति प्रतिपाद्यते—

बालिकारचितवस्त्रपुत्रिका-
क्रीडनेन सदृशं तदर्चनम्।
यत्र शाम्यति मनो न निर्मलं
स्फीतचिज्जलधिमध्यमाश्रितम् ॥२॥

जिस पूजा के भीतर मन निर्मल बनकर सुविशाल संवित् समुद्र के केन्द्र बिन्दु का आश्रय लेकर के सङ्कल्प विकल्पों से हीन होता हुआ विलीन नहीं हो जाता, वह पूजा तो लड़कियों द्वारा कपड़े से बनाई हुई पुतलियों की क्रीड़ा के ही सदृश है, अर्थात् वांच्छित प्रयोजन को सिद्ध नहीं कर सकती है।

यत्र पूजनमहोत्सवे मनो निर्मलतामवाप्य स्फीतो विशालो-ऽसीमो यश्चिज्जलधिश्चेतनात्मकः परसंवित्समुद्रस्तस्य मध्यं सारभूतं परममनवच्छिन्नस्वात्मविमर्शनं तत्राश्रितं सत्तदुन्मुखतायां तद्रूपतामापन्नं च सन्न शाम्यति, सङ्कल्पविकल्पप्रवणत्वं विहाय

तत्काले न लीयते, स्वात्मसंविदि लीनं सत्तद्रूपतां नापद्यते, तदर्चनं तु बालिकाभिर्विरचिताः याः वस्त्रनिर्मिताः पुत्रिकास्तत्क्रीडनेन सदृशं, न स्वात्मसाक्षात्कारफलं, केवलं पाषण्डप्रदर्शनात्मकं बाल-क्रीडातुल्ययोगक्षेमं कल्पनायासमात्रफलं, परपूजाफलापेक्षया। आरुरुक्षोस्तु तत्पदारोहणप्रथमसोपानकल्पं भवेदपि, परं परपूजापेक्षया नोपादेयफलप्रदमिति।

अथाग्रिमेण पद्येन शाम्भवोपायभूतो निर्विकल्पात्मसाक्षात्कार एव परस्याः पूजायाः फलं, तद्विना नासौ पूजेति मन्तुं शक्यतेऽस्मा-दृशैः पूजकैरित्युच्यते—

किं तदर्चनमनल्पकल्पना-
जालशम्बरनिपातितात्मकम्[1]।
यत्र नास्ति स[2] विकल्पनोज्झितः
स्फीतसौख्यशिवसङ्गमोत्सवः ॥३॥

जिस पूजा के भीतर सर्वथा विकल्पहीन और पूरे विकास को प्राप्त हुए आनन्द के चमत्कार से युक्त शिव-सङ्गम का, अर्थात् शिव के साथ सर्वथा उभेदभाव का महोत्सव नहीं होता, वह पूजा भी क्या कोई पूजा है ? अर्थात् वह पूजा नहीं, वह तो अनन्त प्रकार के विकल्प कल्पनामय वज्रपातों का जैसा कोई अवा-ञ्छनीय व्यवहार है।

---

१. निपातितात्मनाम्—(घ)
२. स्व इति (ख. ग.)

यत्रार्चने सोऽनुभूत्येकसाक्षिको विकल्पनोज्झितो निर्विकल्प-साक्षात्कारात्मकः स्फीतसौख्यो ऽसीमपरमानन्दरूपः शिव-सङ्गमोत्सवः स्वात्मनः शिवरूपतयैव साक्षात्प्रकाशास्योत्सवो नास्ति तत्तथाविधनिर्विकल्पस्वात्मशिवतासाक्षात्कारहीनमर्चनं त्वनल्पाः बहुसंख्याका याः कल्पनास्तासां यज्जालं बन्धनकारी सङ्कटः सङ्करस्तद्रूपं यच्छम्बरनिपातितं वज्रप्रपातस्तदात्मकं सत् किमर्चनं भवतीति काकुः प्रश्नार्था। नैव तद् यथार्थमर्चनमिति ध्वनिः। शिवेनैकीभावस्य चमत्कारो यत्र भवति तदेवार्चनं नान्यदनेक-प्रकारकधूपदीपनैवेद्यचामरव्यजनादिकल्पनात्मकम्। तदपि भवत्यर्चनमारुरुक्षोः कृते, योगारूढस्य कृते साक्षाच्छिवसङ्गमोत्सव एव पूजेति।

अथानया रथोद्धतया मनोवृत्तिविगलनपूर्वकप्रयत्नत एव या स्वप्रकाशशिवभावप्रख्यातिरसावेव परममर्चनमिति गीयते—

अप्रयत्नमनिकेतनं पदं
दिव्यमाप्य मनसैव वृत्तयः।
यत्र यान्ति विलयं न सर्वतः
किं तदर्चनमसौ पराभवः ॥४॥

जिस पूजा में देशकाल आदि के सङ्कोचों से रहित दिव्यातिदिव्य स्थिति विना किसी यत्न के प्राप्त होने पर मन के समेत उसकी समस्त वृत्तियां सब ओर से विलीन नहीं होतीं, वह

पूजा भी क्या कोई पूजा है, वह तो साधक के लिये पराभव ही है, पूजा नहीं है।

यत्रार्चने अनिकेतनं पदं देशकालादिसङ्कोचानवच्छिन्नं, वैकुण्ठ-गोलोक-रुद्रलोकादिरूपात् पदाद् भिन्नमुत्कृष्टं च देश-विशेषादिरूपात् पदादुत्तीर्णं शिवभावस्थितिरूपं पदमप्रयत्नमेव यथास्यात्तथा एवमेव ध्यानधारणाद्यभ्यासराहित्येनैवेच्छाबल-प्रयोगमात्रेण लभ्यं पदमवाप्य प्राप्य साधकस्य मनसा सार्धमेव सर्वा मनोवृत्तयः सर्वतो विलयं न यान्ति, किं तदर्चनं भवति, न भवति तदर्चनमपि तु केवलमसौ पराभव एव।

अथाधुना चित्सुधारसपरिप्लावनारहितस्यार्चनस्य पराभव-रूपत्वं कथ्यतेऽनया—

यत्र वर्षति न खेचरीस्थिति-
श्चित्सुधारसभरौघनिर्झरम्[1]।
देहचित्तपरिपीडनावहं[2]
किं तदर्चनमसौ पराभवः ॥५॥

जिस साधना में शुद्ध संविद्बोधरूपिणी परा खेचरी (शुद्ध अद्वैत ज्ञान में ही विचरण कराने वाली) स्थिति संविद्रूपी अमृत

१. निर्झरः (घ)
२. नादहम् (ख. ग.)

के रस के अतिशय के प्रवाहों वाले ऐसे झरने को नहीं बरसाती (बहाती) जिसमें शरीर, चित्त आदि समस्त जड़ पदार्थ पिस नहीं जाते, वह साधना भी क्या कोई पूजा होती है, वह तो साधक का पराभव मात्र है ।

यत्रार्चने खेचरी स्थितिः—खे बोधगगने चरतीति या परा खेचरी शिवभावस्थितिश्चित्सुधायाः संविदमृतस्य यो रसस्तस्य भरस्तस्यौघात्मकः प्रवाहात्मको यो गिरिनिर्झरस्तं, देहस्य चित्तस्य च परिपीडनावहं निर्झरम्, यस्य प्रवाहे देहात्मभावोऽपि पुर्यष्टकात्मभावोऽपि परिपीड्यते विगाल्यते तथाविधं संविन्निर्झरं न प्रवर्षति न प्रवाहयति, तत्त्वर्चनं नैव भवति, अपित्वसौ पराभवः। खेचर्यत्र न हठयोगीया, नापि करणयोगमयी मुद्रा, अपितु शाम्भवसाक्षात्कारमयी स्थितिर्यस्यां साधको बोधगगने एव विचरति न चित्तभूमिकां वा देहभूमिकां वावतरति। देहचित्तपदाभ्यां प्राणशून्ययोरप्युपलक्षणम् । ततस्तदपि यस्यां परस्यां पूजायां निमग्नमिव भवति देशकालाकाराद्यनवच्छिन्ना परा पारमेश्वरी संविदेव च केवला विजृम्भते सर्वतोऽसौ शाम्भवीभूरत्र खेचरी स्थितिरिति वेद्यम् ।

उक्तञ्च शिवसूत्रेषु—

विद्यासमुत्थाने स्वाभाविके खेचरी शिवावस्था । इति

(शि० सू० २-५)

अथ परया पूजया खेचर्यादिशक्तिव्रातपञ्चकवशीकारोऽनायासमेव भवतीति प्रतिपाद्यते—

खेचरीप्रभृतिपञ्चकात्मना
व्याप्तिमम्बरगतां निभालयन् ।
हृद्विकाससुलभं[1] भवापदो
यत्र मुञ्चति न किं तदर्चनम् ॥६॥

जिस पूजा में पूजक खेचरी, भूचरी आदि पांच शक्ति समूहों के द्वारा समस्त प्रपञ्च के भीतर अपनी ऐसी सर्वव्यापकता को निभाता नहीं जो उसकी अहमात्मिका संवित् के परिपूर्ण विकास से सुलभ बन जाती है और ऐसा करके जहां वह संसार रूपी सन्तापों को झाड़कर फेंक नहीं देता, वह भी क्या कोई पूजा होती है ?

यत्रार्चने साधकः खेचरीप्रभृतिभिः पञ्चभिश्शक्तिव्रातैर्निजै-रम्बरगतां सर्वगयां निजां व्याप्ति न निभालयति; अम्बरपदमन्त्र निखिलस्यापि प्रपञ्चस्योपलक्षणम्, एवञ्च निजां व्याप्तिं निभालयन् यत्रासौ हृद्विकासेन—संविद्विकासेन सुलभं यथा स्यात्तथा, संविदेव सर्वस्यापि प्रपञ्चस्यान्तरमाधारभूतं केन्द्रीयं तत्त्वमिति देहस्य हृदयमिव सैव प्रपञ्चस्य हृदयमत्रोक्ता। तस्याः विकासेन परि-पूर्णतया प्रकाशनेन भवापदां मोचनं सुलभं भवति। अतः क्रिया-विशेषणत्वमस्य समस्तपदस्य । तत् संविद्विकासेन सुलभं यथा स्यात्तथाऽसौ परापूजाभ्यासपरः साधको भवापदः संसृतिकारणका

---

१. सुलभां—(ख)

आपदो यत्र नैव मुञ्चति, ता नैव धूनयति, प्रक्षिपति दूरं, तदर्चनं नैवार्चनमपि त्वसौ पराभवः । हृद्विकाससुलभामित्यपि पाठः । तत्पक्षे व्याप्तेर्विशेषणमेतत् पदम् । संविद्विकासेन सुलभां व्याप्तिमिति तात्पर्यम् । संविद् विकासोऽयं प्रशस्तोऽनुत्तराष्टिकायामभिनवगुप्तपादैः—

मोहः शान्तो गुरुवरमुखाम्नायतत्त्वोपलम्भान्
मग्नं चेतः समरससमास्वादलोलं चिदब्धौ ।
भाववातः प्रलयमगमन्निर्विकल्पे समाधौ
सिद्धाभासः स भवति हि मे कोऽपि संविद्विकासः ॥

(अनु० अ० ६)

खेचरीप्रभृतयश्च ते शक्तिव्राताः परमेश्वरस्य यैरसौ सर्वेषां प्राणिनां, सर्वस्य भूतग्रामस्य सर्वान् ज्ञानक्रियात्मकान् व्यापारान् सञ्चालयति । एतासां शक्तीनां स्वरूपमनेकधा मन्यन्ते तावदागमशास्त्रव्याख्यातारः । इति किं तेन विस्तरेणात्रानुपयोगिना ।

अथानेन परस्यां पूजायां बाह्यान्तःकरणवृत्तिष्वनवच्छिन्नपारमेश्वरसंवित्प्रसरो निरर्गलतया विजृम्भत इत्युच्यते—

यत्र साहससमाधिसञ्चयः[१]
प्रस्फुरद्विमल[२]बोधनिर्झरः[३] ।
स्फीतसंविदुदयं न विन्दते
सर्ववृत्तिषु किमेतदर्चनम् ॥७॥

---

१. संश्रयः—(घ) ।
२. प्रस्फुलद्विमल—(क, ख, ग) ।
३. निर्भरः—(घ) ।

जिस पूजा में अलंग्रास युक्ति रूप साहसमय शाम्भवोपाय से होने वाला समावेश तथा स्वयमेव प्रस्फुरित होने वाला निर्मल स्वात्मशिव की साक्षात् अनुभूति का झरना बाह्य और आभ्यन्तर इन्द्रियों के समस्त व्यवहारों के चलते रहने पर भी परिपूर्ण संविद्-विकास के पूरे उदय की स्थिति पर पहुंच नहीं जाता वह पूजा भी क्या कोई पूजा होती है ?

यत्रार्चने साहससमाधिसञ्चयः—साहससमाधेः सञ्चयो यस्मिन्नसौ, साहससमाधिश्चालङ्ग्रासयुक्तिनामा शाम्भवोपाय-विशेषो यत्रेच्छाशक्तिप्रयोगवशतः सहसैव सर्वमात्मसात्कृत्य विश्वप्रतिबिम्बखचितः स्वात्मा स्वयमेव स्वेनैव प्रकाशेन प्रकाश-मानः स्वात्मानमेवंविधं साक्षात्कुरुते, तदसावीदृशः प्रकर्षेण परि-स्फुरतो विमलस्य बोधस्य चित्प्रकाशस्य निर्झरः स्फीतायाः पूर्णतया विकासं प्राप्तायाः संविदः समुदयं न विन्दते सर्वास्वपि बाह्यान्तःकरणवृत्तिषु, तत् किमर्चनं भवति, न भवत्येवेति । परस्यां पूजायां सर्वास्वपि बाह्यान्तःकरणवृत्तिषु प्रसरन्तीष्वपि सर्वत्र सर्वं स्वात्मसंविन्मयमेव साक्षात्क्रियते लोकव्यवहारेऽपि । निर्व्यूढस्थानोऽयं समाधिः शिवयोगिनाम् । सैव तेषां परात्परा पूजा ।

अथैतदुच्यते यज्जगद्ग्रसनरसिको यमराजोऽपि परस्यां पूजायां स्वात्मसंविदग्निज्वालासु हूयते स्वात्मसात्क्रियते इति—

विश्वसंहृति[1]रसैकतत्परो
लेलिहानरसनाकुलो[2] यमः[3] ।
यत्र चिच्छिखिशिखासु हूयते
लीलयैव न किमेतदर्चनम् ॥८॥

समस्त संसार को खा जाने की ही रसिकता में लगा हुआ और चाटती हुई तथा लप-लपाती हुई जीभ को घुमाता हुआ यमराज भी जिस पूजा के भीतर संविद्रूपी अग्नि की ज्वालाओं में खेल खेल में ही स्वाहा नहीं किया जाता, वह पूजा भी क्या कोई पूजा होती है ?

विश्वस्य जगतः संहरणे यो रसस्तत्परो जगद्भक्षको लेलिहानया, रसनया, चाकुलः, सर्वत्र जीवजातघस्मरत्वेन निजां रसनां परिचालयन् यमो अन्तकोऽपि यत्र पूजायां चिच्छिखिनः—संविदग्नेः शिखासु ज्वालावलीषु लीलयैव विनायासमेवमेव न हूयते, स्वाहेत्युक्त्वा न स्वात्मचिद्वह्निमयतां नीयते, न स्वात्मसात्क्रियते, विश्व संहारकोऽपि यत्र स्वात्मनि न संह्रियते तदर्चनं किमर्चनं भवति ? उक्तं तथैवाभिनवगुप्ताचार्येण भैरवस्तोत्रे --

---

१. संसृति—(ख, ग) ।
२. कुतो—(ख, ग) ।
३. दमः—(घ) ।

अन्तक मां प्रति मा दृशमेनां
कोपकरालतमां निदधीहि ।
शङ्करसेवनचिन्तनधीरो
भीषणभैरवशक्तिमयोऽस्मि ॥

(भै० स्तो० ४)

परस्यां पूजायां या देहस्थितिर्जायते शिवयोगिनः साऽधुना वर्ण्यते मनाक्—

स्तब्ध-मन्थर-मनोहरेक्षणः[१]
प्रोल्लसत्पुलकलम्बितानन: ।
मध्यमां भुवमनल्पसम्पदं
यत्र नाश्रयति किं तदर्चनम् ॥९॥

जिस पूजा में पूजक की आंखें निश्चल, शिथिल और साथ मनोहर नहीं बनतीं और जहां उसका मुख उभरते हुए रोमाञ्चों से भर नहीं जाता तथा जहां वह समस्त विश्व की आधारभूता परिपूर्ण और शुद्ध संवित् को ही अपना आप जानता हुआ उसी की ऐसी स्थिति में नहीं ठहरता जिसमें समस्त पर और अपर ऐश्वर्य विद्यमान होते हैं, वह पूजा भी क्या कोई पूजा होती है ?

यत्र साधकः स्तब्धमन्थरमनोहरेक्षणो न भवति, यत्र तस्य ईक्षणे-स्तब्धे-निश्चले, मन्थरे-शिथिले, मनोहरे च न भवतः ;

---

१. रेक्षण —प्रोल्लसत्—(घ) ।

किञ्च यत्र तस्याननं प्रोल्लसद्भिर्विकासं प्राप्नुवद्भिः पुलकैः रोमाञ्चैर् लम्बितमाश्रितं न भवति ; अपरञ्च यत्रासावनल्प सम्पदं परापरसिद्धिभिराढ्यां मध्यमां भुवम्, सर्वस्यापि देहप्राण-बुद्ध्यादेर्जगतश्चापि बाह्यस्य यन्मध्यं, यत्र प्रतिष्ठितमेतच्चक्रवत् सततं प्रचलति सर्वं तत्तु संविदेव, सैव मध्यमा भूः, सर्वस्याप्यन्तर-तमा प्रतिष्ठाभूमिरत एव सैवानल्पसम्पत्, तामसौ साधको यत्रो-पर्युक्तदेहचित्त-सात्त्विकविक्रियासहितं नाश्रयति, तन्निष्ठतामेव न साक्षात्कुरुते, तदर्चनमपि किमर्चनं भवति ।

अथानेनैतदुच्यते यत् परस्यां पूजायां। प्रमाणप्रमेयभावो-त्तीर्णतया स्वात्मकेन संवेदनेन परशिवभावानुभूतिर्भवति शैवसाधक-स्येति--

मानमेयमितिकल्पनोज्झितो
निर्विकारमनिकेतनः[1] शिवः ।
गाढगाढमवगाह्यते क्षणा-
न्नैव यत्र ननु किं तदर्चनम् ॥१०॥

जिस पूजन में तीव्र इच्छा के स्पन्दन से ही तत्क्षण ही वह परमसत्य तत्त्व शिव स्वसंवेदन रूप अपरोक्ष अनुभूति का विषय परिपक्वता पूर्वक नहीं बनता, जो शिव प्रमाण-प्रमेय-प्रमा

---

१. मनिकेतनं शिवः—(घ)
२. गाड गाडमव—(ग)

इस प्रकार की त्रिकोणात्मक कल्पना से परे ठहरा है, जो किसी लोक विशेष की परिधि में बन्धा नहीं रहता, और जिसकी वैसी अनुभूति में साधक के चित्त में कोई परिणाम नहीं होने पाता, इस प्रकार की (शिवत्वानुभूति से रहित) पूजा भी क्या कोई पूजा होती है ?

यत्रार्चने प्रमाण-प्रमेय-प्रमिति-त्रिकात्मिकया कल्पनया रहितः, तत्कल्पनोत्तीर्णोऽनिकेतनः, रुद्रलोकादिनिकेतनरहितो, न लोकविशेषेणैव सम्बद्धोऽपितु लोकाधिपत्वपदवीतोऽप्युत्तीर्णः, शिवो निर्विकारं देहचित्तपरिणामराहित्येन गाढगाढं, न पुनरस्फुटत्वेन, क्षणादेव इच्छोन्मेषसमकालमेव नावगाह्यते न स्वसंवेदनेन स्वयं प्रकाशमानो विमृश्यते, तत् पूजनं किमर्चनं भवति, न भवति तत् परपूजात्मकमर्चनम् ।

अथेदानीं कल्पनाराहित्यं परिपूर्णतुष्टिप्रदत्वञ्च तस्या अर्चनाया उच्यते–

व्योम कल्पममितं[1] निजं वपु-
र्वीक्ष्य चित्परसुधारसाञ्चितम् ।
स्वात्मनात्मनि[2] निरस्त[3]कल्पनो
यत्र हृष्यति न किं तदर्चनम् ॥११॥

---

१. मपितं—(घ)
२. स्वात्मनात्मनिरस्त—(ग)
३. निस्तस्तकल्पना (ख, ग)

जिस पूजा में साधक प्रमाण, प्रमेय आदि प्रपञ्च से शून्य आकाश कल्प तथा अपरिमित संविद्रूपिणी परा चेतना के अमृतमय रस से भरे हुए अपने आपको अपने ही आप में बुद्धि की कल्पनाओं के विना ही निर्विकल्प साक्षात्कारात्मक स्वसंवेदन प्रमाण से ही स्वयं साक्षात् जानकर परमहर्ष को प्राप्त नहीं करता, वह पूजन भी क्या कोई पूजन होता है ?

यत्रार्चनक्रियायां साधको निरस्तकल्पनः सन् निर्विकल्पसाक्षात्कारमात्रपरः सन् निजमात्मीयं व्योमकल्पं-मायीयप्रपञ्चशून्यं वपुः स्वरूपं चिदेव संविदेव परासुधा-परममृतं तस्य रसेनाञ्चितं वीक्ष्य दृष्ट्वा, निरस्तकल्पनः परित्यक्तकल्पनः सन् भूयो भूयो निर्विकल्पे एव पदे तिष्ठन्, स्वात्मना शुद्धेनैश्वर्ययुक्तेन च निजेनानात्मनाऽत्मनि, निजे स्वरूपे एव (साधको) न हृष्यति, तदर्चनमपि किमर्चनं भवति ? तदर्चनमर्चनमेव न भवतीति काश्मीरशैवदर्शनदृष्टिः ।

परस्यां पूजायां सर्वं पारमेश्वरमरीचिमयं पश्यन् योगी विस्मयाविष्टस्तिष्ठतीत्युच्यतेऽनेन पद्येन—

निर्निकेत-निरुपाधि-विप्लव[1]-
स्फारचिद्रवि-मरीचिसञ्चयैः ।
विश्वमारचितमीक्ष्य विस्मयं
यत्र ना[2]विशति किं तदर्चनम् ॥१२॥

---

१. निर्मल—(घ) विप्लवः—(ख) ।
२. नाश्रयति—(घ) ।

स्वर्लोक आदि स्थान विशेष के साथ न बन्धे हुए और माया आदि उपाधियों के विप्लव से रहित जो असीम चित्सूर्य है, उसकी इच्छा, ज्ञान, क्रिया आदि शक्तियां ही उसकी किरणें हैं। तो यदि किसी पूजा में इस सारे प्रपंच को ही उस चित्सूर्य की बहिर्मुख विकास को प्राप्त हुई उन किरणों से ही बना हुआ नहीं देखा जाता और वैसे देखते हुए अपार आनन्दमय विस्मय का यदि आवेश नहीं होने पाता तो वह पूजा भी क्या कोई पूजा होती है ?

स्वर्लोकादिनिकेतरहिता:-देशावच्छेदशून्या:, निरुपाधि-विप्लवा:-उपाधिरूपैर्विप्लवै: शून्या:, स्फाररूपा:-भृशं प्रविकसिता:, ये चिद्रवे: परसंविद्रवे: मरीचयो-रश्मय:, तेषां सञ्चयै:-समूहै:, एवारचितं विश्वमीक्ष्य तथाभूतं साक्षात्कृत्य यत्र साधको विस्मय-माश्चर्यं नाविशति तदर्चनमर्चनं नैव भवति परम्। चित्सूर्यस्य च ते रश्मय: इच्छा-ज्ञान-क्रियाशक्तयस्तत्प्रपञ्चात्मकानि च शक्त्यन्तराणि। तन्मयमेव विश्वं पश्यति परपूजाभ्यासपरो योगी। एवमेवोक्तं शिवसूत्रे—

विस्मयो योगभूमिका: (शि० सू० १—२)

स्पन्द कारिकायामपि—

तमधिष्ठातृभावेन स्वभावमवलोकयन्।
स्मयवान इवास्ते यस्तस्येयं कुसृति: कुत:॥

(स्प० का०—११)

अथानेन परपूजापेक्षया भेदात्मकध्यानाद्यभ्यासानां नीरसत्वमुच्यते—

यत्र नित्य-परहर्ष-निर्भर-
श्चित्सुधारसविपान[1]घूर्णितः ।
ध्यानयोगकलनासु लज्जते
नीरसासु न किमेतदर्चनम् ॥१३॥

जिस पूजा में पूजक निरन्तर प्रवाहरूप से चलते हुए परम आनन्द से परिपूर्ण होकर संविद्रूपी अमृत के रस को बहुत अधिक पीने से चकराता हुआ रसहीन ध्यान, योग, आदि का अभ्यास करने में लज्जा का अनुभव नहीं करता, वह पूजा भी क्या कोई पूजा होती है ?

यत्रोपासनकर्मणि साधकः नित्यमेव स्वात्ममहेश्वरत्व-साक्षात्कारजनितेन परेणात्मानन्दमयेन हर्षेण निर्भरः-सुपरिपूर्ण-श्चित्सुधायाः-संविदमृतस्य रसस्य विशेषेण यत् पानं तेन मधुपान-कल्पेनेव नित्यं घूर्णितः, सदैव घूर्णमानः सन् भेदमयीषु ध्यान-योगादिकलनासु भेदमयत्वेनैवाभेदात्मसाक्षात्कारापेक्षयाऽतीव नीर-सासु न लज्जते, तत्र प्रवृत्तिमपि लज्जाकरीं नानुभवति, तदुपासन-कर्म किमर्चनं भवति ,न भवतीति ।

अथ परस्यां पूजायां स्वत एव मूलाधारे सहस्त्रारे च युगपद् विचरन् योगी भैरवरूपतां निजामनुभवतोत्युच्यते—

---

१. निपात घू०—(घ) ।

शक्तिविस्तरविमर्शविस्फुरत्-[1]
कन्द-युग्म-युगपद्विगाहनात् ।
भैरवं वपुरुदारचेष्टितं
यत्र न स्फुरति किं तदर्चनम् ॥१४॥

अपनी पारमेश्वरी शक्ति के असीम विस्तार के विमर्श से स्फुरित होते हुए दोनों ही मूलाधार और सहस्रार चक्र में एक साथ गतिशील होने से यदि अपना अनन्त शक्ति विलासों से युक्त भैरवाकार स्वरूप पूजा में चमक नहीं उठता तो वह पूजा भी क्या कोई पूजा होती है ?

शक्तेर्निजस्यैश्वर्यस्य यो विस्तरोऽसीमः प्रसारो, असीमता चानवच्छिन्नता, तद्विमर्शेन विशेषेण स्फुरणशीलं यत्कन्दयुग्मं सहस्रार-मूलाधार-चक्रद्वयं तत्र विगाहनेन तदन्तर्गतिशीलत्वेन निजं भैरवं वपुः स्फुटं परिस्फुरति, तत्रासौ स्वशक्तिविमर्शो विशेषेण दीप्यते-इति । गोरक्षनाथीये योगे, महता कष्टेनैतदवाप्यते, परमत्र परस्यां पूजायामेतदनायासमेव स्वयमेव सम्पद्यते । एतच्च कुण्डलिनीयोगविदः सकलीकरणाख्यायामवस्थायां भवतीति वदन्ति । तस्यैवंविधस्य शक्तिस्फुरणयुक्तस्य कन्दयुगलस्य युगपत्-समकालमेव विगाहनात्-तत्र तथा स्फुरत्तयावगाहनकारित्वात्

---

१. निस्फुरत्—(क)

साधकस्य निजमुदारचेष्टितं-सुविशालतया कृत्यपञ्चककारि भैरवं पारमेश्वरं वपुः स्वरूपमर्चने यदि न स्फुरति तर्हि तदर्चनमेव नास्ति ।

अथानेनेन्द्रियादिव्यापारे चलत्यपि स्वात्मपरमेश्वरता-विमर्शसन्ततिर्निराबाधैव तिष्ठति परपूजापरस्येत्युच्यते—

इन्द्रियेषु विषयानुवर्तिषु[1]
प्राणवर्त्मनि निजप्रवाहके ।
कापि निर्वृतिमयी[2] चिदूर्जिता
यत्र नोल्लसति किं तदर्चनम् ॥१५॥

यदि पूजा के भीतर पूजक की इन्द्रियां भी अपने विषयों का अनुसरण करती ही रहें और उसके प्राण अपान भी अपने प्रवाह के मार्ग में निरन्तर चलते ही रहें और फिर भी कोई आनन्दमयी और असीम शक्तिवाली चेतना यदि उल्लास को प्राप्त नहीं होती रहे तो वह पूजा भी क्या कोई पूजा होती है ?

यत्र पूजायामिन्द्रियेषु विषयान् स्वाननुवर्तमानेष्वपि, इन्द्रियै-र्विषयेषु गृह्यमाणेष्वपीति, प्राणवर्त्मनि च प्राणापानगतिमार्गेऽपि

---

१. षयानुवृत्तिषु—(घ)

२. निर्वृतिमये—(ख. ग.)

निजप्रवाहके-स्वरसेन गमागमक्रियाप्रवाहयुक्ते सति । प्राणस्येन्द्रियाणां च वृत्तिषु निरर्गलं प्रवहन्तीष्वपि काचिदनिर्वचनीया परमानन्दरूपिणी, ऊर्जिता-शक्तिस्वरूपिणी चित् शुद्धाऽऽनन्दस्वभावा संविन्निरन्तरं नोल्लसति, प्राणापानवृत्ती इन्द्रियवृत्तयश्च यस्यां बाधामुपस्थातुं नालं भवन्ति, सा शक्तिशालिनी संविद् यत्र सततगत्या नोल्लसति तदर्चनमपि किमर्चनं भवति ।

अथाग्रे नादविन्दुमयानां भावानां लय इव भवति दिव्या च खेचरतोदयं याति परस्यां पूजायामित्युच्यते—

दिव्यखेचरदृशा निरीहया
नादबिन्दुमयभावसञ्चयम् ।
यत्र शुष्कमिव पावकस्तृणं
न क्षयं नयति किं तदर्चनम् ॥१६॥

शुद्ध ज्ञानोदय रूपिणी दिव्य खेचरी मुद्रा से विकास को प्राप्त होने वाली और विषयों की इच्छा से शून्य योगमयी दृष्टि से यदि पूजक नाद-बिन्दुमय नामरूपात्मक भाव समूहों के समूहों का भी अपनी पूजा में उस तरह से क्षय न करे जिस तरह आग सूखे घास का क्षय करती है, तो वैसी पूजा भी क्या कोई पूजा होती है ?

एका खेचरी नाम हठयोगमुद्रा प्रसिद्धा । अपरा तु शाम्भव-

योगमयी यस्यां साधकः स्वात्मनो वास्तविकस्य परशिवात्मकस्य स्वभावस्य पुनः पुनरावेशेन परिशीलनाभ्यासादनन्तरं सततमेव व्यवहारे निमग्नोऽपि वस्तुतोऽन्तर्बोधगगने एव विचरति। तच्च बोधगगनं पारमैश्वर्य-सामर्थ्यमण्डिता परमानन्दचमत्कारमयी शुद्धाऽनवच्छिन्ना संवित्। तस्यामेव यद्विचरणं तदेवात्र स्तोत्रे दिव्या खेचरीत्युक्ता। तत्तस्याः हृदयङ्गमीभावे या समुदेति योगिनो दृष्टिस्तया दिव्यखेचरदृशा—स्वात्मसंविन्मय्या दृशेति। निरीहया विषयादिभोगाद्यभिलाषरहितया। अपूर्ण एव भोग-लोलिकया पीड्यते, न परिपूर्णां संविदमात्मत्वेनाभिमन्वानः; इति निरीहया तया दिव्यखेचरदृशा यदि शिवयोगी नादविन्दुमयं—नामरूपात्मकं भावसञ्चयं मायीयं सर्वमपि प्रपञ्चं तथा क्षणेन क्षयं न नयति यथा शुष्कं तृणराशिमग्निः क्षणेन भस्मसात्करोति, तर्हि तस्य तदर्चनमपि किमर्चनं भवति। नादबिन्दू अत्रं मायीये नामरूपे। सर्वं नामरूपप्रपञ्चमसौ योगी स्वात्मतयैव पश्यन् स्वात्मतामेव नयति; यथा पावकस्तृणराशिं पावकतां प्रापयतीति। परो यो नादोऽसौ सादाशिवो विमर्शः, परश्च यो विन्दुर्दन्त्यौष्ठ्य-वकारादिर्न पुनः पवर्गीयबकारादिरसौ तु शिव एवेच्छाशक्ति-समाविष्टः इति विदाकुर्वन्तु सुधियः। बकारादिर्बिन्दुरीश्वरः।

अथश्लोकयुग्मेनान्यदपि फलजातं परस्याः पूजायाः उच्यते युग्मकशैल्या—

शान्तिमेति[1] न विकल्पविप्लव-
श्चिच्चमत्कृतिरसो न वर्धते ।
लुप्यते न घनवासनावनं
कापि तृप्तिरसमा न[2] जायते ।।१७।।
मन्यते न कृतकृत्यतां जनो[3]
द्वैतमेघ-तिमिरं न भिद्यते ।
यत्र दोषशतसङ्कुलं मनो
न प्रसीदति किमेतदर्चनम् ।।१८।।

जिस पूजन के भीतर सांसारिक अशुद्ध विकल्पों की बाढ़ शान्त नहीं होती, जिसमें संविद्रूपता के चमत्कार का आनन्द वृद्धि को प्राप्त नहीं करता, भोग आदि की वासनाओं का घना वन जिसमें अदृश्य नहीं हो जाता, कोई अनुपम तृप्ति जिसमें अनुभव में नहीं आती, जिसमें अभ्यास करने वाले को पूरी तरह से कृतकृत्यता का अनुभव नहीं होता, जहाँ द्वैतरूपी बादलों के घने अन्धकार को छिन्न-भिन्न नहीं किया जाता, जिसके भीतर साधक का मन सैंकड़ों ही दोषों से दूषित होता हुआ भी अनायास

---

१. मेत्य—(ख, ग)।
२. च—(क)।
३. मनो—(घ)।

ही निर्मल नहीं हो जाता, वह पूजन भी क्या कोई पूजन होता है ?

यस्मिन्नर्चने विकल्पविप्लवः पशुत्वसंस्कारजोऽशुद्धविकल्पानां विप्लवः—स्वच्छन्दस्वात्मस्वरूपावरको व्यावहारिकः सांसारिकश्च विकल्पप्रवाहः शान्तिं नैति, निर्विकल्पे स्वात्मसाक्षात्कारप्रकाशे विलीनो न भवतिः, चितः शुद्धायाः संविदो यो रसः निजपारमैश्वर्यविमर्शचमत्कारोऽसौ यत्र न वर्धतेऽहरहोऽभ्यासपाटववशात्, घनं निविडं च यद् भोगवासनानां वनं तद्यत्र न लुप्यते, यत्र कापि-अनिर्वचनीयाऽसमा अनुपमा च तृप्तिर्न जायते, यत्र जनः पूजकजनः कृतकृत्यतां न मन्यते, द्वैतरूपाणां मेघानां तिमिरम् अन्धकारो यत्राद्वैतस्वात्मशिवप्रकाशेन न भिद्यते, छिन्नं भिन्नं न क्रियते, यत्र च दोषाणां शतैः कामक्रोधलोभादिभिस्तज्जनितैश्चापरैर्दोषव्रातैः सङ्कुलं भरितमपि मनः—पूजकस्य मानसं न प्रसीदति—अद्वैतमये स्वात्मशिवत्वसाक्षात्कारे शुद्धसंविदभेददशायां निमग्नत्वेन शुद्धसंविद्रूपतामापन्नं सन्न प्रसीदति, सर्वथा शुद्धं न भवति, विनापि कृच्छ्रचान्द्रायण-यम-नियम-प्रत्याहाराद्यभ्यासं, तदर्चनमपि किमर्चनं भवति ?

अथ स्वात्मनः परशक्तिसम्बोधेन मन्त्रवीर्यप्रकाशनं भवति परस्याः पूजायाः अनुष्ठाननेत्युच्यते—

चिन्नभःसरसि सारसीं परां
शक्तिमच्छविभवां[1] प्रबोधयन् ।
मन्त्रवीर्यममितं निसर्गतो
यत्र नाश्रयति किं तदर्चनम् ॥१६॥

शुद्ध संवित् के आकाशरूपी झील में विचरण करने वाली तथा अत्युत्तम विभूतियों वाली, पराशक्तिरूपिणी सारसी (हंसी) को जगाता हुआ पूजक जिस पूजा में एवमेव अत्युत्तम मन्त्रवीर्य को, अर्थात् मन्त्रों के अनुभूतिमय रहस्य को, विना यत्न के आश्रित नहीं होता, वह पूजा भी क्या कोई पूजा होती है ?

यत्र पूजनमहोत्सवे पूजकः चिन्नभःसरसि चित्-चेतनात्मिका शुद्धा संविदेव प्रपञ्चशून्यत्वेन नभः-आकाशः, स एव सरो-जलाशयस्तत्र या सारसी हंसी तत्कल्पा पराशक्तिर्निजा, तामेव स्वां परां शक्तिम्, परशक्तिस्वरूपिणीम्, अच्छविभवाम्-अच्छो निर्मलो-मायाप्रपञ्चादुत्तीर्णो विभवः—सर्वज्ञत्वसर्वशक्तिमत्वादिरूपो यस्यास्तां, शक्तावत्र हंसीत्वारोपः, तां प्रबोधयन्—मायीयमावरणमपसार्य प्रकाशयन्, अमितम्—अपरिमितम् मन्त्रवीर्यम्-परिपूर्णमहंविमर्शाख्यं वीर्यम्,

---

१. प्रभवां—(क, ख, ग)।

निसर्गतः—स्वाभाविकत्वेन विनापि कल्पनाद्यभ्यासमेवमेव यत्र नाश्रयति, यत्रात्मानं सर्वशक्तिसमन्वितपरिपूर्ण-संविदात्मकाहम्वि-मर्शमयत्वेन न विमृशति साधकस्तदर्चनमपि किमर्चनं भवति ।

परस्याः पूजायाः फलत्वेन मरणादिभयहानिरनेनोच्यते—

निर्विकारमजरं[1] निरामयं
निर्विकल्पममलं[2] निजं वपुः ।
वीक्ष्य जन्ममरणोदितं[3] भयं
यत्र मुञ्चति न किं तदर्चनम् ॥२०॥

जिस पूजा के भीतर साधक अपने आपको निर्विकार, जरारहित, नीरोग, विकल्पहीन, और सर्वथा निर्मल रूप में निर्विकल्पभाव से देखकर जन्म मरण रूपी संसृति के भय को एकदम दूर नहीं फेंक देता वह पूजा भी क्या कोई पूजा होती है।

यत्र पूजायां साधकः निजं वपुः वास्तविकं स्वरूपं, निर्विकारम्-उपचयापचयादिविकारपरिमुक्तम्, अजरम्-जरारहितम्, निरामयम् आधिव्याधिशून्यम्, अमलम् आणवादिमलत्रयरहितम्,

१. मजडं—(घ)।
२. मजरं—(घ)।
३. मरणोद्यतं—(क, ख, ग)।

निर्विकल्पम्-विकल्पकल्पनोत्तीर्णम्, वीक्ष्य-साक्षात्कृत्य, जन्ममरणाभ्यामुदितम्-ताभ्यां तदनुबन्धिभ्यश्च जराव्याधिप्रभृतिभ्यः समुत्थितं भयं न मुञ्चति, तदर्चनमपि किमर्चनं भवति । अत्र निर्विकल्पमितिपदं क्रिया विशेषणत्वेनापि योक्तुं शक्यम् । स्वात्मानमेवं विधस्वभावं निर्विकल्पं यथा स्यात्तथा वीक्ष्य-निर्विकल्पेन परिपूर्णशुद्धाहंविमर्शात्मकेन स्वसंवेदनात्मना साक्षात्कारेण साक्षात्कृत्येति योजना ।

अथ द्वाभ्यां युग्मकत्वेन परस्यां पूजायां परस्याः शक्ति-भट्टारिकायाः साक्षाद्दर्शनं भवतीत्युच्यते—

शान्तवीचिचय-सिन्धु-सन्निभां
सर्वसंविदुदयावनिं पराम् ।
सृष्टि-संस्थिति-लयं-[1]प्रसक्तिभियर्-
विश्व-सुन्दर-विवर्त-वर्तिनीम् ॥२१॥
शक्तिचक्र-परमाधि[2]-देवताम्
अम्बर[3]-प्रथम-भूमिकामजाम् ।
मङ्गलामसम-मन्त्र-मातरं
यत्र पश्यति न किं तदर्चनम् ॥२२॥

---

१. लयं—(ख, ग)
२. मादिदेवताम्—(ख, ग)
३. मसर-प्रथम—(घ)

जो पराशक्ति उस निश्चल समुद्र जैसी है जिसमें तरंगों के समूह शान्त हो गये हों, और उनके नये समूह अभी प्रकट नहीं हो गये हों, जो सभी प्राणियों की अहं विमर्शमयी संविदों की उत्पत्ति की भूमि है, जो सबसे परे ठहरी हुई है, अर्थात् जिसके ऊपर और किसी का अधिकार या सत्ता है ही नहीं ; सृष्टि, स्थिति और संहार रूपी पारमेश्वरी कृत्यों के प्रसंग से जो विश्वात्मक अतीव सुन्दर विवर्त्त में ओत-प्रोत भाव से ठहरी हुई है, समस्त विश्व के सभी व्यापारों को चलाने वाली शक्तियों के समूहों की जो सर्वोच्च अधिदेवता है, शिवशून्यात्मक अनाश्रितावस्था की भी जो पूर्व भूमिका है, जो स्वयं अजन्मा है, मंगलात्मिका है, और भोग-मोक्ष-प्रद उत्तम मन्त्रों का भी प्रकाश करने वाली है, वैसी पराशक्ति का साक्षात्कार जिस पूजा में नहीं होता, वह पूजा भी क्या कोई पूजा होती है ?

यत्र पूजायां पूजकः शान्तो विलीनोऽनुत्थितश्च वा वीचीनां लहरीणां चयो यत्र तथाविधो यो निस्तरङ्गः सिन्धुस्तत्सन्निभां तत्सदृशीं परां शक्तिं साक्षान्न पश्यतीत्यग्रे सम्बन्धः । सदाशिवादि-तत्त्वव्रातसृष्टेः पूर्वं पराशक्तिर्वीचीतरङ्गव्रातसमुत्थानात् प्राग्यो बहिरनभिव्यक्तः समुद्रान्तस्तलस्थो वीचीतरङ्गोत्थापनाद्यनुकूलोऽन्तःस्पन्दनोत्थापकः संरम्भइव, येनैव च समुद्रः स्पन्दमानः संस्तरङ्गितो भवति, तेनान्तःसंरम्भेणोपमीयते ऽत्रश्लोके । अत एव शान्तवीचिचयसिन्धु-सन्निभामिति विशेषणं प्रयुक्तं

कविवरेण । तस्या एवान्तःसंरम्भेणैव यतः सदाशिवादितत्त्वानां बहिरवभासस्ततोऽमुमेव सदाशिवादिकृमिपर्यन्तानां प्राणिनां या अहमिति प्रकाशमानाः संविदस्तासामुदयस्य दर्पणनगरन्यायेन प्रथनशीलस्य आभासस्योत्पत्तिभुवम् । जडस्यापि जगतो ये सृष्टि-स्थिति-लया-स्तेषां प्रसक्तिभिः-प्रसङ्गैस्तत्तत्कृत्यसम्पादनेन विश्वात्मको योऽयं सुन्दरो विवर्तो अहन्तया स्वात्मन्यन्तर्विद्यमानस्येदन्तया बहिर्विवृतिस्तत्रोतप्रोतभावेन वर्तिनीम् । असौ पराशक्तिरेव जगद्-विवर्ते सर्वत्र व्यापकतया तिष्ठन्ती तत्रोता, तस्यामेव च सर्वमपीदं जगत् प्रोतं, सूत्रे मणिगणा इव, यत्तावज्जगद्व्यवहारकलना-सञ्चालकमघोर-घोर-घोरतर-शक्तिव्रातचक्रम्, द्वादशकालीचक्रं वा समस्त-प्रमातृ-प्रमाण-प्रमेय-व्यापार-कलनापरं तस्योभयरूप-स्यापि शक्तिचक्रस्य परमां सर्वोत्कृष्टाम् पराम्अधिदेवताम्; पाठान्तरे आदिभूतां देवताम्; अम्बरस्य विश्वसृष्ट्यारम्भेऽव-भासमानस्य शिवशून्याख्यस्यानाश्रिततत्त्वस्यापि प्रथमभूमिकाम्, तत्सृष्टिसम्पादनोचितचित्स्पन्दरूपाम्; अजाम्-सततोदिता-मुत्पत्तिविनाशरहिताम् ; असमाः-अत्युत्कर्षकारणादनुपमा ये मन्त्राः-अभीष्टभोगमोक्षप्रदाः अघोराद्यास्तेषामपि मातरम्-तदावि र्भावकरीं, तां तथाविधां परां पारमेश्वरीं, मङ्गलाम्-कल्याणकारि-णीम्, शक्तिं यत्र साधकः स्वात्माभेदेन न पश्यति, न साक्षात्कुरुते— "एवंविधशक्तिस्वभावोऽहं परशिव एवेति"—न विमृशति, तदर्चन-मपि किमर्चनं भवति । नैव भवति सिद्धैः कृतं यथार्थं परममर्चन-मिति—

अथैतेन प्राप्तस्वात्मसाक्षात्कारस्य परस्यां पूजायां रतस्य साधकस्य कायिकी स्थितिर्वर्ण्यते—

सोम-सूर्य-दहनेन्धनोद्धत[1]-
स्फीत-चिज्ज्वलन-दीप्ति-भास्वरः ।
दुर्निरीक्ष्यगतिरिद्धतेजसा[2]
भाति यत्र न किमेतदर्चनम् ॥२३॥

चन्द्रमा, सूर्य और अग्निरूप तीन इन्धनों से भड़क उठी हुई तथा खूब विस्तार को प्राप्त हुई संविद्रूपी आग से चमकता हुआ तथा उसकी तीव्र चमक से ऐसा चमकता हुआ कि उसकी गति को बड़ी कठिनाई से देखा जा सके, अर्थात् उसे देखने से आँखें चुंधिया जाएं, इस तरह की देदीप्यमान स्थिति को जिस पूजन में साधक अनायास ही प्राप्त न कर पाए, वह पूजन भी क्या कोई पूजन होता है ?

सिद्ध-सम्प्रदाय-साधनाक्रमे सोमः-प्रमेयम्, सूर्यः-प्रमाणम्, दहनश्च-प्रमाता, एतत्त्रय मेवेन्धनम्, तेनोद्धतः-प्रज्वलितो यः स्फीतोऽपरिमितः, चिज्ज्वलनः संविद्वैश्वानरः, तस्य दीप्त्या भास्वरो-देदीप्यमानवपुः। अत एवेद्धेन प्रवृद्धेन तेजसा यत्रार्चनपरो योगी न भाति न प्रकाशते तदर्चनमप्यर्चनं भवति किम् ?

---

१. नोद्धतः—(ख, ग)
२. गतिरृद्धि तेजसा (ख, ग) (गतिरक्रमःशिवो) (घ)

त्रिकसाधनायां बुद्धिध्याननाम्नि योगेऽहमात्मकः संविज्ज्वलनः प्रमाण-प्रमेय-प्रमातृ-संघट्टाकारो द्वादशकालीशक्तिचक्रवेष्टितो भाव्यते प्रथमं, ततस्तस्य प्रमाण-प्रमेय-प्रमातृविषयं यद्यत् कलनं तत्तद् भावनया भाव्यते पुनः पुनः। तदभ्यासरसे परिपक्वतां याते योगी स्वात्मनः सृष्टिसंहारादिपञ्चकृत्यकारित्वं साक्षादनुभवन्नात्मानं शिवं प्रत्यभिजानाति। एतच्च तन्त्रालोके पञ्चम अह्निके विंशतितमां कारिकामारभ्यैकचत्वारिंशत्तमां कारिकां यावद् विस्तरतः प्रकाशितम्। अस्मिन् सिद्धध्यानयोगे सिद्धे सति साधकस्तथा तेजस्वी भवति यथा साधारणैर्जनैः स्वैरं द्रष्टुमपि न शक्यते इति वर्णितमनेन श्लोकेन।

अथ त्रिभिः पद्यैः परस्याः पूजायाः विशिष्टं फलमुच्यते—

आत्मनात्मनि न जानते[१] विधिं
निस्तरङ्ग-परबोध[२]-भास्वराः[३]।
यत्पदस्थिति-जुषो महाजना[४]
मुक्ति[५]-संसृति-समान-बुद्धयः ॥२४॥

---

१. जानति—(ख, ग)
२. परबोध—(ग)
३. भास्वरः—(ख, ग)
४. महाजनः—(ख, ग)
५. मुक्तसंसृति—(घ)

यद्यदापतति वेद्यताभुवं
तेन तेन ननु यद्विवर्जितम् ।
नित्य-निर्मल-समान[1]-भूमयो
यत्पदे विमति-बाल-कल्पनाः ॥२५॥
यद्विशृङ्खल-महोदयोल्लस[2]-
च्छक्तिपातवशतो विजृम्भते ।
तत्पदं यदि गुरुप्रसादतो
लब्धमुत्तममथार्चितः शिवः ॥२६॥

शिव को सचमुच पूजित किया गया है, ऐसी बात को तब माना जा सकता है, जब साधक जीवन्मुक्ति की ऐसी दशा को प्राप्त कर जाए जिस दशा में प्राप्त महापुरुष अपने आपके भीतर अपने आपके विषय में किसी भी विधि निषेध आदि की प्रक्रिया को ज़रा भर भी जानते नहीं, जिस दशा में ठहरे हुए महापुरुष शङ्का आतङ्क आदि तरङ्गों से रहित परतर स्वात्म साक्षात्कार से देदीप्यमान होते रहते हैं, और मुक्ति और बन्धन दोनों को ही समान दृष्टि से शिव की लीला ही के रूप में देखते रहते हैं । फिर वह दशा उन उन सभी भावों से शून्य होती है,

---

१. समाधिभूमयः—(घ)
२. भदोदयो—(ख, ग)

जो जो भाव प्रमेयता के क्षेत्र में उतरते हैं, उस दशा में ठहरे हुए महापुरुषों की दृष्टि में पातञ्जल योग की निर्विकल्प समाधि जैसी सुषुप्तिमयी नित्य और निर्मल समान नामक प्राण की भूमिकाएं भी अबोध बालकों की कल्पनाएं जसी प्रतीत होती हैं, जो उत्कृष्टतर अवस्था शिव के स्वातन्त्र्य से उद्बोधित होने वाले महान उदय से उल्लास को प्राप्त होने वाले अनुग्रह शक्तिपात से ही गुरु कृपा पूर्वक विकास को प्राप्त होती है; उसी उत्तम अवस्था को प्राप्त किया जाए तो तब माना जा सकता है कि सचमुच शिव को पूजा गया है। अर्थात् ऐसी अवस्था को प्राप्त करना ही शिव की परा पूजा का फल है।

अत्र परया पूजया लभ्यस्य पदस्य वर्णनं क्रियते, उच्यते च यदीदृशं पदं यदि पूजया लब्धं, तदैव शिवः पूजितो भवतीति स्वीकर्तुं शक्यते नान्यथेति। तद्यथा--यस्मिन् पदे स्थिताः महानुभावा आत्मना आत्मनि विधिं नैव जानते, इदं मया कर्त्तव्यमिदं न कर्त्तव्यमिति द्वैतं यत्र पदे न प्रकाशते। किञ्च यत्पदं न विधि-विषयतां कथमपि याति। सर्वत्र केवले स्वात्मशिवे एव प्रकाशमाने सति को विधिः? किम्प्रयोजनश्च? कथञ्च तत्र विधेरवकाशो-ऽवभासोऽपि वा। अर्चनापराः महाजनाः साधकाः यस्मिन् पदे स्थितिं जुषमाणाः सेवमानाः सन्तो मुक्तिसंसृत्योर्विषये समानबुद्धयः, उभयमप्येतत् स्वात्मशिवलीलाविलासमेव यत्र ते पश्यन्ति। उक्तञ्च तथाभिनवगुप्ताचार्यैर्बोधपञ्चदशिकायाम्—

एतौ बन्धविमोक्षौ च परमेशस्वरूपतः ।
न भिद्यते न भेदो हि तत्त्वतः परमेश्वरे ॥इति॥

(बो० पं० द० १४)

श्रीमदुत्पलदेवपादैश्च शिवस्तोत्रावल्याम्—

दुःखान्यपि सुखायन्ते विषमप्यमृतायते ।
मोक्षायते च संसारो यत्र मार्गः स शाङ्करः ॥इति॥

(शि० स्तो० २०—१२)

यद्यद् व्यवहारजातं वेद्यतायाः भिन्नरूपायाः प्रमेयताया भुवं भूमिकामापतति, प्रमेयताकलङ्कस्पृष्टं भवति, तेन तेनाखिलेन व्यवहारजातेन यत्पदं विवर्जितम्-अस्पृष्टमेव, यस्मिंश्च पदे नित्यनिर्मलाः समानभूमयः-समानाख्यस्य प्राणस्य भूमयो विमतीनाम्-विरुद्धमतीनां बालानामज्ञानां जनानां कल्पनाः इति प्रतिभान्तीति शेषः । त्यागोपादानशान्त्या सौषुप्ते पदे प्रकाशमानाः याः स्वात्ममहेश्वरतासाक्षात्कारशून्याः आत्यन्तिक-दुःख-निवृत्तिमय्यो निर्बीजसमाधिकल्पा अपि दशाः प्राणवृत्तेर्विषयाः, ता निर्बीजसमाधिकल्पा अपि दशाः यस्मिन् पदे विरुद्धमतियुक्ताज्ञजनकल्पना इति प्रतिभान्ति तत् पदं परमार्चनेन लभ्यते । विशृङ्खलेन कर्मसाम्य-मलपाकादि-शृङ्खला-रहितेन, बाह्यकारणशृङ्खलाबन्धशून्येन, परमेश्वरस्य सर्वथा पूर्णतया च स्वतन्त्रेण कृपाकटाक्षात्मकेन महोदयेनैव कारणभूतेन उल्लसतः—उल्लासं प्राप्नुवतः शक्तिपातस्य परमेश्वरकृतस्य परस्यानुग्रहकृत्यस्य वशतः सामर्थ्यत एव यत् पदं विजृम्भते विकासमायाति, तत्तादृशं स्वात्मशिवभावप्रत्यभिज्ञात्मक-

मुत्तमं पदं यदि गुरुप्रसादतो लब्धं तदैव विश्वसनीयं यत् सत्य-मर्चितः शिव इति।

स्वात्मपरमेश्वरतायाः साक्षात्कारात्मिका या प्रत्यभिज्ञा तस्या मूलकारणं पारमेश्वरानुग्रहशक्तिपात एव, न मलपाको वा, कर्मसाम्यं वा, चित्तनैर्मल्यं वा, वैराग्यादिकं वा। तस्य सर्वस्य कारणपरतन्त्रत्वात्। भक्तिरपि न तस्य मूलकारणम्, यतस्तस्यैव हृदये पारमेश्वरी भक्तिः पदं कुरुते यस्मिन् परमेश्वरः प्रसीदति। ततः परमेश्वरस्य प्रसादरूपो योऽनुग्रहः स एव यदि साधके पतति तदैव स भक्तिमान् भवति, गुरुमुपसर्पति शास्त्रे रुचिमान् भवति, योगादिसाधने च प्रवर्तते। गुरुरत्रोपायः। सा च गुरुप्राप्तिरपि शक्ति-पाताधीनैव। तदुक्तमागमवाक्येन—

शक्तिपातवशाद्देवि नीयते सद्गुरुं प्रति। इति (आ०)

शक्तिपातस्य करणेऽकरणेऽन्यथाकरणे च सर्वथा स्वतन्त्रः शिवः। अत एव विश्रृङ्खलोऽयं साधकस्य महोदयो येन तस्मिन् शक्तिपातलीलाया उल्लासः शिवस्य। तेनैव शक्तिपातेन प्रत्यभि-ज्ञात्मिका स्थितिर्विजृम्भते। एष एव सिद्धान्तः सविस्तरं प्रकटित आचार्याभिनवगुप्तनाथैरीश्वरप्रत्यभिज्ञा-विमर्शिन्याः प्रथमायाः कारिकायाः व्याख्याने—

कथञ्चिदासाद्य महेश्वरस्य
दास्यं जनस्याप्युपकारमिच्छन्।

(ई० प्र० १-१)

इत्यत्र कथञ्चिदिति पदस्यार्थं स्पष्टीकुर्वद्भिः। असौ विस्तरतस्तत्रैव द्रष्टव्यः।

अथानेन शुद्धस्वतन्त्रसंविद्विश्रान्तिः परपूजाफलमिति प्रतिपाद्यते—

भाव-सञ्चय-विमुक्त-विग्रहा
विश्वमय्यपि परप्रथात्मिका।
कापि संविदमलाम्बरप्रभा
जृम्भते यदि तदार्चितः[1] शिवः ॥२७॥

यदि साधक की ऐसी शुद्ध संवित्-स्वरूपता विकास में आ गई हो जिसका स्वरूप समस्त प्रयोगात्मक भाव समूहों से उत्तीर्ण हो, जो विश्व को प्रतिबिम्ब रूपतया धारण करती हुई और इस तरह से विश्वात्मिका होती हुई भी एकमात्र परमशिवात्मक शुद्ध संवित् ही के रूप में चमकती हो, फिर जो प्रमाण, प्रमेय, प्रमाता रूपी त्रिकोण से रहित होती हुई शुद्ध शिवाकाश रूप में ही चमक रही हो, तो तभी यह माना जा सकता है कि उस साधक ने सचमुच ही शिव का पूजन किया है।

यदि साधकस्य शुद्धा परिपूर्णा च पारमैश्वर्यमण्डिता

---

१. तदार्चितः—(ख, ग, घ)

संविज्जृम्भते, तर्हि स्वीकर्तुं शक्यते यच्छिवः सत्यमर्चित इति। सा तस्य संविन्न शरीरादिघटादिसम्भिन्ना, अपितु सर्वेणापि जडेन भावसञ्चयेन-भावव्रातेन, विमुक्तविग्रहा, तद्राहितशरीरा, केवलं संविदेवेति। न चापि विज्ञानाकलप्रा।य-शान्तब्रह्मवादिसम्मता सृष्ट्याद्यैश्वर्यशून्याऽसौ संविदपि तु स्वैश्वर्यविलास-क्रीडया दर्पण-नगरन्यायेन षट्त्रिंशत्तत्त्वात्मकविश्वमय्यपि परप्रथात्मिका—परसंविन्मात्रशरीरा, न वैष्णवादिमते इव तस्याः संविदः शक्तेः कोऽपि परिणामः। परिणामराहित्येनापि सदा स्वस्वरूपेऽवतिष्ठ-मानापि स्वैश्वर्यविल।सतो विश्वावभासछायोपरञ्जिता सती, अमला—जाड्यात्मकमलरहिता, अम्बरवत्—आकाशवद् यस्याः प्रभा सदैकरूपा। अम्बरेणोपमया विकारराहित्यमात्रमत्र विवक्षितं, न जाड्यादिकमिति वेद्यम्। यद्येवंविधा विश्वप्रतिबिम्बखचितापि सती स्वात्मसंवित् शुद्धैव विजृम्भते साधकस्य, तदा विश्वसनीयं यदनेन सत्यं शिवोऽर्चितः इति।

अथापरेण परस्य पूजनस्य साफल्ये त्यागोपादानादि-रहितत्वेन स्वात्मसंविद एव सर्वथा प्रकाशोऽवशिष्टो भवती-त्युच्यते—

किञ्चनापि न विमुच्यते[1] क्वचित्
किञ्चनापि न च गृह्यते क्वचित्।
स्वं वपुर्विमलबोधनिर्भरं
दृश्यते यदि[2] तदार्चितः[3] शिवः ॥२८॥

---

१. किमुच्यते—(क)
२. तदार्चितः—(ख, ग)
३. यपि—(ग)

यदि साधक ऐसी दशा में विचरण करे जहां न तो किसी भी वस्तु का कहीं भी परित्याग ही किया जा रहा हो और न उपादान ही, फिर जहाँ अपना स्वरूप सर्वतः एकमात्र निर्मल संवित्-प्रकाश रूप ही अनुभव में आ रहा हो तो तब माना जा सकता है कि उस साधक ने सचमुच शिव का पूजन किया है।

यदि क्वचिदपि किञ्चिदपि नापि विमुच्यते, न चापि गृह्यते, त्यागग्रहणविरमे केवलं विमलबोधनिर्भरम्-निर्मल-प्रकाशात्मक-बोध-निर्भरम्, सर्वथा, सर्वतः, सर्वदा च प्रकाशमात्र-स्वरूपं देशकालाद्याकारापरिच्छिन्नं स्वं वपुः—स्वीयं स्वरूपं दृश्यते-स्वसंवेदनेन साक्षात्क्रियते सर्वतः, तदा प्रत्येतव्यं यत् सत्यं शिवोऽर्चित इति। उक्तञ्चैवमेवाचार्याभिनवगुप्तपादैरनुत्तराष्टिकायाम्—

मा किञ्चित्त्यज मा गृहाण विरम स्वस्थो यथावस्थितः। ।। इति ।।
(अनु० अ०—2)

न त्यागी न परिग्रही भज सुखं स्वस्थो यथावस्थितः। इति च।
(तदेव—१)

अथानेनैतत्कथ्यते यत् परस्यां पूजायां परस्याः काल्या देव्या उद्बोधनं भवति साधकस्येति—

भैरवा विविधकल्पनात्मकाः
प्रोल्लसन्ति बहवो यतोऽम्बिका[1]।
सा यतः स्फुरति तत्परं पदं
भाति चेद् गुरुदृशा[2] शिवोऽर्चितः ।।२९।।

१. अम्बिकाः—(क)
२. गुरुदशा—(घ)

पारमेश्वरी शक्ति की विविध प्रकार की कलना से कल्पित अनेकों भैरवात्मक प्राणी भी जिस महाकाली नामक जगज्जननी से उल्लास को प्राप्त हुआ करते हैं, वह महाकाली भी जिस परम शिवपद से स्फुरित होती है, वही परमपद यदि गुरु कृपा से अभिव्यक्त हो रहा हो तो तब समझा जा सकता है कि सचमुच शिव की पूजा हुई है।

सर्व-सृष्टि-संहारादि-कृत्यजातं, प्रमाण-प्रमेय-प्रमातृव्यापारजातं वा यया शक्त्या शिवः कलयते सास्य शक्तिः कालीति कथ्यते। तस्याः परस्याः पूर्णायाश्च कालेरुद्बोधनं परस्यां पूजायामवश्यमेव भवति। काल्या विविधप्रकारककलनात्मका एवोत्कृष्टा भैरवाः। अत एवोक्तं विविधकल्पनात्मका भैरवाः भरण-रवण-वमन-सामर्थ्ययुताः जगद्भरणकारिणः, विमर्शनात्मकं रवणं च ये कुर्वन्ति ते तथोक्ताः, सृष्ट्यात्मकं वमनं कर्तुं समर्थाश्च ये उत्कृष्टेषु भुवनेषु विद्यमाना भैरवास्ते महाकाल्या एव विविधया कल्पनया कलिताः सृष्टाः वेदितव्याः। ते तथाविधा बहवो भैरवा अपि यतः प्रोल्लसन्ति यतः आविर्भवन्ति, यस्याः कलनया जायन्तेऽसौ पराम्बिका महाकाली यतः पदात्-अनुत्तरात् परशिव-पदात्, स्फुरति-परिस्पन्दते बहिस्तत् परिस्पन्दसुभगं पदं चेद् गुरुदृशा—गुरुकृतेनोपदेशेन सानुग्रहेण भाति—हृदयङ्गमतां याति तदा विश्वसितव्यं यत् सत्यमर्चितः शिव इति।

अथानेन स्तोत्रकाव्यस्योपसंहारः प्रारभ्यते—

आसादितं गुरुमुखादिदमप्रयत्न-
सिद्धं शिवार्चनमपाप्मधियामवाप्यम्[१] ।
यत्तन्मया निगदितं तदनल्पवाच्छा-
सम्बोधनाय सुधियां शिवभक्ति[२]-भाजाम् ॥३०॥

पाप रहित बुद्धि वाले साधकों के द्वारा प्राप्य तथा अपने कायिक, वाचिक, मानसिक आदि प्रयत्नों से अलभ्य जिस पर पूजात्मक शिव पूजन रूप साधना को मैंने अपने सद्गुरु के उपदेश से प्राप्त किया, उसी इस शिव पूजन का वर्णन मैंने सज्जन भक्तों के भीतर इस (उच्चतम शिव पूजन) के प्रति तथा सर्वोच्च पुरुषार्थ (जीवन के प्रयोजन) के प्रति तीव्रतर अभिलाषा को जगा देने के लिये किया।

इदमुपरि वर्णितम्, अपाप्मधियां-पापरहितबुद्धिभाजाम्, एव कृतेऽवाप्यम्, अप्रयत्नसिद्धं—कायिक-वाचिक-मानस-प्रयत्न-राहित्येन परेण शाम्भवशक्तिपातेनैव कारणभूतेन सिद्धम्, शिवार्चनम्—शिवभावसमावेशाभ्यासात्मकं परिपूर्णभुक्तिमुक्ति-साधनं यन्मया गुरुमुखात् सानुग्रहाद् गुरूपदेशादासादितम्, तदेव मया शिवभक्तिभाजां सुधियां तदर्थे तल्लाभाय योऽनल्पोऽतितीव्रोऽभिला-षो वाञ्छा-इति प्रोक्तो, तस्य तीव्रस्याभिलाषस्य सम्बोधनाय

---

१. मपापधिया—(ख, ग)
२. शिव-शक्ति (घ)

निगदितम्-वर्णितम् । अनेन वर्णनेन शिवभक्तिभाजां हृदये एतादृशं शिवार्चनं प्रति तीव्रोऽभिलाषः समुदियादिति प्रयोजन-मुररीकृत्य निगदितमिति सम्बन्धः । शिवभक्ता एव अस्य परस्य शिवार्चनस्याभ्यासेऽधिकारिणो नान्ये शिवभक्तिरहिता; । इति नात्र जातिलिङ्गावस्थादिविचारः शैवदीक्षायाम्; एकमात्रायाः शिवभक्तेरपेक्षात्र । शिवभक्तश्चाण्डालोऽप्यत्राधिकारी, भक्तिहीनश्च विद्वान् ब्राह्मणोऽप्यधिकारशून्यः । तदुक्तमागमे—

न मे प्रियश्चतुर्वेदी मद्भक्तः श्वपचोऽपि सन् ।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहम् ॥ इति । (आ०)

महाकाव्यपरम्परानुसारमत्र त्रिंशे पद्ये छन्दः परिवर्तनं कृतं कविना, एकोनत्रिंशेषु पद्येषु रथोद्धता वृत्तम् । अत्र पुनस्त्रिंशे पद्ये वसन्ततिलका । अग्रे चोपसंहारपद्येऽनुष्टुप् छन्दः ।

अथानुष्टुभोपसंहरति स्तोत्रं कविः—

अनवच्छिन्न-चिद्व्योम-परमामृतबृंहितः ।
नागाभिधो[1] व्यधादेतां[2] चित्त-सन्तोष-
त्रिंशिकाम् ॥३१॥

देश-काल-आकार-कृत अवच्छेदों से रहित चिन्मय आकाश

१. नागार्जुनो—(ख. ग.)
२. एनाम्—(ख. ग. घ.)

रूपी परम अमृत से विकास को प्राप्त कर चुके हुए नाग नाम वाले आचार्य ने इस परमार्चनत्रिंशिका का निर्माण किया।

अनवच्छिन्नं—देशकालाकाराद्यवच्छेद-रहितं यच्चिद्व्योम चिदाकाशः, केवला शुद्धा संविदत्र प्रपञ्चोत्तीर्णता-मात्रेणाकाशेनोपमीयते, तत् संविद्व्योम एवैश्वर्यभरविश्रान्तत्वेन परमानन्दस्वभावम्, आनन्द एव तस्यामृतत्वेनोक्तम्, ततः संविदाकाश एव परममृतम्—जगदानन्दस्वभावम्—तेन स्वस्य तदात्मतासाक्षात्कारेण बृंहितः—वृद्धिं विकासञ्च प्रापितः, परशिव-समावेशरसवर्द्धित इति तथाविधो नागाभिधो—नागार्जुनाभिधानः सिद्धः कविरेनां—प्रागुक्तां परमार्चनत्रिंशिकाम्—तदाख्यं स्तोत्रकाव्यम्, व्यधात् कृतवानिति।

इति महा माहेश्वराचार्य-श्री नागार्जुन[1] कृता परमार्चन-त्रिंशिका।

इस प्रकार महा माहेश्वराचार्य श्री नागार्जुन के द्वारा निर्मित यह परमार्चन त्रिंशिका पूरी हो गई।

---

१. इति नागार्जुनकृता परमार्चनत्रिंशिका (ख०ग०)

इति श्रीमदाचार्यवर्येनागाभिधपादैर्विरचिता परमार्चनत्रिंशिका समापूरितेति शिवम्। (घ०)

चित्तसन्तोषत्रिंशिका

स्वात्मप्रत्यभिज्ञोदयात् पूर्वं सिद्धस्यास्य कवेर्नागार्जुनस्य चित्तं बन्धरूपायां दशायां लुठदासीत्। परं जातायां स्वात्मप्रत्यभिज्ञायां तदभ्यासरसेन च परिपक्वतां याते तस्याः प्रत्यभिज्ञायाः हृदयङ्गमीभावे सर्वमपि जगत् स्वविलास कल्पितमिव पश्यन् कविरनेन दार्शनिकेन काव्येन जीवन्मुक्त्यवस्थायां व्यापृतस्य निजचित्तस्य प्राक्तनबन्धनदशान्वितेन स्वेनैव चित्तेन साकं तुलनां विदधानः स्वं चित्तमाश्वासयंस्तस्मै परिपूर्णसन्तोषप्रदां त्रिंशिकामेतां विरचितवान्। विविधैश्च भावैरसौ विधीयमाना तुलना तोषयति तस्य तात्कालिकीं चित्तवृत्तिम्। अनेन काव्येनैतन्मिषाच्छैवशास्त्रसम्मताया जीवन्मुक्त्यवस्थाया अपि वर्णनं कृतं वर्तते, यत्रावधातव्यं सुधीभिः। कांस्कान् भावानादाय तुलनासौ विधीयतेऽत्रेति तत्तत्पद्यव्याख्यावसरे स्फुटीभविष्यति। अत्र काव्य एकोनत्रिंशच्छ्लोकाः वसन्ततिलकावृते निबद्धाः प्राक्तनकविपरम्परामनुसृत्य त्रिंशे श्लोके अन्यद् वृत्तमुपयुक्तं कविना हरिणीसमाख्यम्, तदन्ते चानुष्टुभा काव्यमुपसंहृतम्। अथ श्लोकार्थ एकैकशो व्याख्यास्यते हिन्दीभाषानुवादश्च दास्यते—

लोकोत्तरानुभव-सस्मित-घूर्णमान-[१]
स्वानन्द-सुन्दर-विनिर्मल-निर्निमेषा ।
यत्स्फारतः पशुरपीश्वरतां प्रयाति[२]
सा कापि दृग् विजयते गुरुपुङ्गवानाम्[३]॥१॥

सर्वोत्कृष्ट सद्गुरु महाराज की उस कृपार्द्र दृष्टि की जय जयकार हो जो अपने लोकोत्तर स्वरूप की अनुभूति के प्रभाव से विकास को प्राप्त हुई होती है, आनन्द से चकराती रहती है, उसके चमत्कार से सुन्दर बनी रहती है, यथार्थ दर्शन की महिमा से निर्मल हुई होती है और आनन्द की मस्ती से शिथिल और निमेश-रहित होती है, फिर उस गुरुदृष्टि के अनुग्रहात्मक विकास से बद्ध जीव भी ईश्वर बन जाता है, अर्थात् सद्यः जीवन्मुक्ति की दशा को प्राप्त कर जाता है।

शिवैक्यसाक्षात्कारात्मकेन लोकोत्तरेणानुभवेन—समावेशात्मनानुभवेन, सस्मिता-स्मितपदेनात्र-स्मेरताभिप्रेता, न हासः, तत् सस्मिता-सविकासेति, घूर्णमाना च या गुरुपुङ्गवानां-साक्षात्कृत-स्वात्म-महेश्वर-भावानां गुरूणाम्, निजमाहैश्वर्यविमर्शनेन य आनन्दातिशयस्तेन सुन्दरा निर्मला च तत्त्वसाक्षात्कारतः आनन्द-

१. पूर्णमान—(क)
२. मुर्यति (घ)
३. गुरुपुङ्गवस्य (घ)

चमत्कारातिशयतश्च निर्निमेषा, सुमन्थरा यांऽनुग्रहप्रवणा च दृग्, यस्याश्च स्फारतो—विकासतः, प्रसन्नतया प्राप्तेन दृग्विकासेन येन पाशत्रयबद्धो पशुप्रमातापि सद्यः ईश्वरतां श्रयति, स्वात्म-महेश्वरभावं साक्षात्कृत्य तदभ्यासतो जीवन्मुक्तिमयीमीश्वरतां, देहपाते च सर्वथेश्वराभेदभावं प्रयाति प्राप्नोति सा काप्यनुभवैक-गम्य-परमार्था गुरुपुङ्गवानां दृग् विजयते, सर्वोत्कर्षेण वर्तते इति तां प्रति प्रणतोऽस्मीति ध्वन्यते । जयनमस्कारयोरितरेतराक्षेप-कत्वात् । गुरुदृङ्नमस्कारात्मकं मङ्गलमिदं ग्रन्थारम्भे निबद्धं कविवरेण । सस्मितघूर्णमान-स्वानन्द-सुन्दरत्वादिना प्रहृष्टत्वं तेन चानुग्रहपरत्वं गुरुदृशोऽभिप्रेतम् । स्वयं पूर्णतया प्रहृष्ट एव हि महा-पुरुषः परान् प्रहर्षयितुं प्रवर्तते । गुरुपुङ्गवश्च स एव गुरुर्य एकतः परिपूर्णज्ञानवानपरतश्च योगसिद्धिमान् । तस्यैवानुग्रहदृष्टिपात-मात्रेण जनस्याज्ञानं नश्यति यथार्थञ्च ज्ञानं समुदेत्यन्तः, सर्वमल-प्रक्षालन-पूर्वं चोत्कृष्टतरलोकलभ्या भोगावाप्तिर्वा भवति, सद्यो-मुक्तिरपि वा भवति कृपापात्रस्य साधकस्य ।

दिष्ट्या भवानल-शिखाशततापतप्तं
जन्माटवीषु विषमासु कदर्थितं यत् ।
चेतस्तदेतदधुनाऽमलचित्सुधाब्धि-
मध्ये निमग्नमसमं भजते प्रशान्तिम् ॥२॥

सौभाग्य की बात है कि जो मेरा चित्त पहले संसृति रूपी

अग्नि की सैकड़ों ज्वालाओं के सन्ताप से संतप्त बना रहता था और संसृति चक्र के अत्यन्त भयानक महावनों के भीतर पीड़ित होता रहता था, वही यह चित्त अब निर्मल संवित् समुद्र के बीच में निमग्न होकर एक अनुपम शान्ति का उपभोग कर रहा है।

यन्मम चेतः पूर्वं भवानलस्य संसृतिदहनस्य याः शिखाः ज्वालास्तासां शतस्य तापेन-सन्तापेन, तप्तं-सन्तप्तमभूत् पूर्वम्, किञ्च यन्मे चित्तं प्राग् विषमासु-दुःखबहुलासु जन्माटवीषु संसृतिकान्तारेषु, कदर्थितम्-सुपीडितमभूत् तदेतन्मदीयं चेतः-चित्तम्, अधुना अमलो-निर्मलो यश्चित्सुधायाः अब्धिः-समुद्रः, तस्य मध्ये निमग्नं सद् असमानुपमां प्रशान्तिं भजते। इदानीं संसारव्यवहारमाचरदपि निर्मलचित्स्वभावतोऽसमाम्-अनुत्तरां प्रशान्तिं भजते॥

व्यामूढमन्दमिव[1] संशय-दोष-दुष्टं
चेतो यदेतदभवद् भवदुःखपात्रम्।
जातं तदद्य गुरुपादसरोज-सेवा-
सञ्जात-निर्मल-विबोध-महाप्रकाशम् ॥३॥

जो मेरा यह चित्त पहले मोहग्रस्त था, मन्दशक्ति था और संशयरूपी दोषों से भरा होता हुआ संसृति से होने वाले दुःखों

१. मन्धमिव—(ख, ग, घ)

का पात्र बना रहता था वही मेरा यह चित्त आज गुरुवर के चरण कमलों की सेवा से उद्‌बुद्ध हुए निर्मल स्वात्मज्ञान से अतीव देदीप्यमान प्रकाश से युक्त हो गया है।

व्यामोहयुक्तत्वेन व्यामूढं, तीव्रावबोधसामर्थ्यहीनत्वाच्च मन्दमिव, संशयरूपैर्दोषैर्दुष्टं संशयदोषग्रस्तमिति यन्मे एतच्चेतः-चित्तम्, भवदुःखानां संसृतिजनितानां जन्म-जरा-व्याधिमृतिप्रभृतीनां दुःखानां त्रिविधानां सन्तापानाम्, पात्रमभूत्पूर्वम्, तदेव मे चित्तमद्य-अधुना गुरोः-सदुपदेशदीक्षादिकारिणः, पादसरोजयोश्चरणकमलयोः सेवयोपायभूतया सञ्जातो निर्मलस्य विबोधस्य स्वात्मस्वरूपप्रत्यभिज्ञात्मकस्य ज्ञानस्य महान् प्रकाशो यस्य, तदेवंविधं समभवत्। पूर्वं दुःखैकपात्रं सन्मे चित्तमिदानीं परिपूर्ण-यथार्थस्वात्मज्ञानोदयेन कृतकृत्यतात्मकं सन्तोषं प्राप्तवदिति।

संकोचमाश्रितवतो निबिडं विमोहात्
यस्याभवद् भयमिहेन्द्रियपन्नगेभ्यः।
चेतस्तदाप्य विमलोर्जितसंविदाज्ञां
निःशङ्कमद्य रमते विषयाटवीषु ॥४॥

विमोह के कारण जो मेरा चित्त पहले बहुत घने सङ्कोच से ग्रस्त होकर रहता था और इन्द्रिय रूपी सांपों से बहुत डरा रहता था, वही चित्त निर्मल और शक्तिशाली संवित् की आज्ञा

को पाकर अब विषयों के घने वनों में निश्शङ्क भाव से विहार कर रहा है, अर्थात् अब उसे विषयभोग से पतन की शङ्का का नाम भी सूझता नहीं, क्योंकि वह परिपूर्ण स्वातन्त्र्य के क्षेत्र में विहार कर रहा है।

पूर्वं विमोहादज्ञानात्कारणात्, निविडं-घनम्, सङ्कोचमाश्रितवतः—पदेपदे विधिनिषेधकृतं सङ्कोचं सेवमानस्य, यस्य मे चेतसः इन्द्रियरूपेभ्यः पन्नगेभ्यः सर्पेभ्यः इह-लोकव्यवहारे भयमभवत्, यद्धि सदैव विषयसेवने विधि-निषेधा तङ्कितं सदिन्द्रिय-विषयोपभोगे पतनमाशङ्कमानं सदैवेन्द्रियसर्पभीतमभवत्, तदेवेदानीं मे चेतोऽद्य अधुना विमला प्रमेयछायाकलङ्करहिता, ऊर्जिता-पारमैश्वर्यसामर्थ्यसुशोभिता च या स्वात्मस्वरूपिणी परा संवित् तस्या आज्ञां-सृष्टि-संहारादि-पञ्चकृत्यप्रवृत्तिशीलताम् आसाद्य, विषयाटवीषु—गहनेषु विषयवनेषु, निःशङ्कं—पातभयकृतशंकारहितत्वेन स्वच्छन्दं तासु विषयाटवीषु—विषयात्मकेषु गहनेषु वनेषु रमते-क्रीडति। उक्तञ्च तथैव—मालिनीविजयोत्तरे तन्त्रे—

तस्वे निश्चलचित्तास्तु भुञ्जानो विषयानपि।
न संस्पृश्येत दोषैः स पद्मपत्रमिवाम्भसा॥

(मा० वि० तं० १८-८०)

कन्दर्पबाणविषमं हरिणेक्षणाभिः
पीतं हतं कवलितं मुषितं[1] यदासीत्।
तत् पात्रतामुपगतं परमोक्षलक्ष्मी-
प्रेमामृता[2]प्लुत-कटाक्ष-परम्पराणाम्॥५॥

१. गदासीत—(ग)
२. मृतप्लुत (ख. ग.)

जिस मेरे चित्त को पहले हरिणियों के समान सुन्दर आंखों वाली स्त्रियां कामदेव के बाणों से बुरी हालत बनाती हुई पी चुकी थीं, मार चुकी थीं, निगल चुकी थीं, और लूट ले गई थीं, वही मेरा चित्त अब अत्युत्कृष्ट मोक्षलक्ष्मी नामक सुन्दरी के प्रेम रूपी अमृत से आप्लावित कटाक्षों की श्रेणियों का पात्र बन गया है । तात्पर्य यह है कि पीछे बन्धन दशा में कवि के चित्त को सुन्दर स्त्रियां चुरा रही थीं परन्तु अब मोक्षलक्ष्मी रूपी उत्कृष्ट सुन्दरी उसे प्रेमामृत से भरी तिरछी दृष्टियों से लगातार देखती हुई उसके वश में पूरी तरह से आ चुकी है ।

यन्मम चित्तं पूर्वं कन्दर्पस्य-कामदेवस्य, बाणैर्विषमं-बहुकष्ट-मयम् यथा स्यात्तथा हरिणेक्षणाभिः सुन्दरीभिः पीतं च, हतं च, कवलितञ्च, मुषितञ्चासीत्, यत् सर्वथा ताभिर्वशीकृतं सत् स्वात्मानं पीतं, हतं, कवलितं मुषितञ्च जानाति स्म, तदेव मे चित्तमधुना, परा-उत्कृष्टा स्वात्मनः पारमैश्वर्योपभोगस्य चमत्कार-दशामयी या मोक्षलक्ष्मीर्जीवन्मुक्तिदशा, तद्रूपा च सुन्दरी नायिके-तिसमासोक्ति-भंग्योक्ता पराभ्योऽपि परैव या सुन्दरी तस्याः प्रेमा-मृतेनाप्लुताः तद्भरिताः तत्प्रसारयन्तश्च ये कटाक्षाः अर्धनिमी-लितादृष्टिपातास्तेषां परम्पराणां पात्रतामुपगतमित्याश्चर्यमयो हर्षभरः ।

क्लिष्टं यदेतदभवज्जपकष्टयोग[1]-
प्राणप्रवाहविनिरोध–कदर्थनाभिः ।
चेतस्तदद्य परमाद्वय[2]सामरस्य-
सञ्जातसम्मदरसासवमत्तमास्ते[3] ॥६ ॥

जिस मेरे चित्त को पीछे जप करते रहने से और कष्टदायी हठयोग से तथा प्राण के प्रवाह को रोक कर किये जाने वाले प्राणायाम आदि कष्टप्रद अभ्यासों से बहुत ही क्लेश हुआ करता था, वही यह मेरा चित्त तो अब परम अद्वैत सिद्धान्त की उत्कृष्ट साम्यरस्य की स्थिति में उद्बुद्ध हुए उत्कृष्टतर आत्म आनन्द के आस्वाद के चमत्कार की मदिरा से मस्त होकर आनन्द ले रहा है ।

यो जपः स्मार्तो धर्मः, यश्च कष्ट-हठयोगो गोरक्षनाथ-प्रचालितो हठयोगः, प्राण प्रवाहस्य च यो विनिरोधः पातञ्जलयोग-क्रमे, तद्रूपाभिः कदर्थनाभिः शारीर-प्राणीय-पीडाभिर्यन्मदीयं चेतः पूर्वमतीव क्लिष्टं-क्लेशभाजनमभूत्, तदेवाद्य मे चित्तं परमं यदद्वयं, यत्राद्वये सर्वं स्वात्म-शिवरूपमेव दृश्यते, न पुनर्ब्रह्म सत्यं जगन्मि-

---

१. होम (ख. ग) ।
२. परमामृत (क) ।
३. मत्तमद्य (ख. ग.) ।

श्येति प्रसिद्धं वैवर्तिकमद्वयमपि तु पारमैश्वर्यविलासावभासात्मकं तदद्वयं यदनुसारं परमेश्वर एव स्वेच्छया स्वस्वभावत एव जगद्रूपतया, सृष्टिसंहारादि-पञ्चकृत्यात्मकतया च स्वयमेवाभासते, दर्पणनगरन्यायेनापरिणममानश्च तथा तथा स्वस्वातन्त्र्यादेव नटवदाभासते, तास्मिन्नद्वये यच्छिवशक्त्योरत्यन्तं सामरस्यमभेदात्मकं तेन सञ्जातो यः सम्मदः-प्रहर्षः, परमः स्वात्मानन्दस्तस्य यो रसः अस्वादः तद्रूपेण निरतिशयचमत्कारात्मना, मत्तं मदोन्मत्तमिवास्ते आनन्दनिर्भरं तिष्ठति। एतच्चातीव सन्तोषकरं मम चित्तस्य कृते।

यो भेद[1]तीव्र-शिशिर-प्रसरोपघात-
भीतो मनो-मधुकरो हतशक्तिरासीत्।
आसाद्य सोऽद्य शिवधाममधुं सदास्ते
संविल्लता-कुसुम-सौरभ-पान-मत्तः ॥७॥

भेद दृष्टि रूपी तीव्र शिशिर ऋतु के प्रसार की चोटों से डरे हुए जिस मेरे मन रूपी भौंरे की सारी शक्ति पहले नष्ट हो चुकी थी, आज वही मेरा चित्त भ्रमर शिवभाव के साक्षात्कार रूपी बसन्त ऋतु को पाकर के संविद्रूपिणी कुसुमलता के फूलों की सुगन्धि का सेवन करने से सदा मस्त बनता हुआ विश्राम ले रहा है।

---

१. यो भीत—(क)।

भेदस्य-भेददृष्ट्यात्मनः तीव्रस्य-अत्युग्रहस्य, शिशिरस्य यः प्रसरः तस्योपघातात्-तत्प्रहाराद् भीतो यो मनोमधुकरो मदीयचित्त-रूपो भ्रमरो हतशक्तिरासीत् पूर्वम्, स एव मनोमधुकरोऽद्य शिव-धामरूपं-शैवप्रकाशरूपं मधुं वसन्तम्, आसाद्य-प्राप्य, सदा-निरन्तरं, संविल्लतायाः यानि कुसुमानि, स्वात्म-शिवभाव- विमर्श-मयानि तेषां यत्सौरभं दिव्यातिदिव्यश्चमत्कारस्तस्य पानेन चर्वणया मन्तः आस्ते सुखं तिष्ठति ।

त्यक्त[1]-स्वतन्त्र-निज रूप-महाप्रभावं
यत्कर्म-बिन्दु[2]-धरणीषु विलीनमासीत् ।
स्वच्छ-प्रभा-प्रसर-पूरित-सर्वलोकं
चेतश्चिदम्बरपदेन तदद्य[3] माति ॥८ ॥

जो मेरा चित्त पीछे अपने स्वतन्त्र परमेश्वरतात्मक महान् प्रभाव का परित्याग करके क्षुद्रतर कर्मों की संसृति चक्रमयी भूमिकाओं में विलीन होकर रहता था, उसी ने आज अपने निर्मल संवित् प्रकाश के प्रसार से सारे संसार को भर दिया है, अर्थात् वह सारे संसार को ही स्वात्मरूपिणी संवित् ही के रूप में देख रहा है

---

१. व्यक्त--(ख. ग)
२. बिन्धु - (ख)
३. तदध्य--(ग)

और ऐसा करके अब संविद्रूपी आकाश की स्थिति में सर्वत्र व्याप्त होकर ठहरा है।

त्यक्तः-अपहस्तीकृतो विस्मृत इति स्वतन्त्रस्य परमेश्वरात्मकस्य निजस्य रूपस्य-स्वरूपस्य महान् पारमैश्वर्यात्मकोऽसीमः प्रभावो येन तन्मम चेतः प्राक् तथाविधं सत् कर्मबिन्दु-धरणीषु कर्मविन्दूनां-क्षुद्रातिक्षुद्राणां कर्मणां धरणीषु कर्मसंस्कारस्य-क्षुद्रकर्मकर्तृत्वाभिमानस्य च कार्ममलाख्यस्य धरणीषु, माया-प्रकृति-पृथ्वी रूपासु विलीनमासीत्—तत्रैव संसरत्तद्रूपतां प्राप्तमासीत्, तदेवेदानीं स्वच्छा या प्रभा चित्प्रकाशः शुद्धस्तस्य प्रसरः प्रवाहः, इन्द्रियादिमार्गैर्बहिः प्रसरः, तेन संवित्प्रकाशेनैव पूरितः सर्वो लोको येन तत्तथाविधं, सर्वमपि स्वात्मसंविन्मयमेव पश्यन्मे चेतो अन्तःकरणम्, चिदेवसंविदेव स्वच्छत्वेन, विश्वोत्तीर्णत्वेन, निः सीमतया चाम्बरः-आकाशः चिदाकाशस्तेन माति-आत्मानं तत्समतया विमृशति-तद् व्याप्नोतीति। अद्येति पदस्य अधुनेति तात्पर्यम्।

यत्नेन वाञ्छितमनल्पविकल्प[१]-जाल-
विघ्नै[२]स्तिरस्कृतमवाप न यत् प्रवेशम्।
दुर्भेदभग्न[३]-विषमार्गलभिन्नमार्गं
चेतस्तदद्य[४] रमते शिवमन्दिरान्तः ॥९॥

१. मनल्पजाल—(ग)
२. विधिनस्ति—(ग)
३. भिन्न—(क, ख, ग, घ)
४. तदध्य—(ग)

मेरा चित्त पीछे अत्यन्त यत्न पूर्वक शिवजी के मन्दिर में प्रवेश करना तो चाहता था परन्तु लगातार चलने वाले अनन्त अशुद्ध विकल्प ज्ञान क्षणों के प्रवाह रूपी विघ्नों से ढके रहने के कारण वहां प्रवेश ही नहीं पा रहा था, वही मेरा चित्त आज उस शिवमन्दिर के भीतर स्वतन्त्रता पूर्वक विहार कर रहा है, क्योंकि जो दुर्भेद और भयानक अर्गल दण्ड उसके बहिर्द्वार में लगे थे वे सब टूट-फूट गये और प्रवेश का मार्ग पूरी तरह से खुल गया।

यन्मम चेतः प्राग् यत्नेन वाञ्छितं बहुप्रयत्नपूर्वकमभिलषितमप्यनल्पैर्विकल्पानां जालकैः समूहैस्तद्रूपैर्विघ्नैस्तिरस्कृतं सद् यत्र शिवमन्दिरे संविदेकतायां प्रवेशं नावाप कदाचिदपि; तदेवाद्यइदानीं, शिवमन्दिरान्तः शिवप्रासादस्य मध्ये अद्वैते पारमेश्वरे संवित्तत्त्वे रमते-स्वैरं क्रीडति, यतो दुर्भेदा अपि ते भग्नाः विषमाः अगलास्तेन तासां भङ्गेन भिन्नः-प्रवेशयोग्यो जातो मार्गः प्रवेशमार्गो यस्य तस्य शिवमन्दिरस्यान्तर्विहरति। स्वात्मशिवस्तु सदैव प्रकाशमान एवाहमिति । परं जना स्वात्मानं संवित्प्रकाशमयं नाभिमन्यन्ते, यतो देहप्राणादिनिष्ठेनाशुद्धेनाहमिति विकल्पात्मकेन ज्ञानेन तेषां वास्तविकं स्वरूपं तिरोहितं तिष्ठति। अपरं च सततगत्या प्रचलतां नील-पीत-सुख-दुःखादीनां विकल्पज्ञानानां ये प्रवाहाः प्रतिजीवं चलन्ति, ते एव तेषां संवित्प्रकाशं गोपयन्ति। ततस्त एव विघ्नास्तेषामपाये च स्वैरं शिवभावे प्रवेशः। तदद्य विकल्पहीनस्य स्वात्मनः प्रकाशे सम्यक् प्रकाशमाने सति विकल्प-

कृतमावरणं शिथिलतां यातं, तेन चानावृतः स्वात्मा अनवच्छिन्नतया-अनावृततया च, स्वयं प्रकाशते इति तात्पर्यम् । शिवभावस्थितिरेवात्र रूपकनीत्या शिवमन्दिर-प्रवेशतया वर्णिता ।

योगव्रतादिनियमैरुपसेवितापि
नावाप दर्शनपथं किल यस्य जातु ।
संवित्प्रिया सुभगमूर्जित[1]भाग्यसम्प-
च्चेतस्तदद्य[2] न जहाति मुहूर्त्तमेकम् ॥१०॥

मेरा चित्त पीछे योग व्रत आदि नियमों के द्वारा संवित् स्वरूपिणी प्रेयसी की आराधना करते रहने पर भी कभी भी उस के दर्शनमात्र भी नहीं पा सका । परन्तु अब परमेश्वर के अनुग्रह से और गुरु की कृपा से वह इसे अत्यन्त सुन्दर और अत्यन्त वृद्धियुक्त भाग्यों वाला समझती हुई एक मुहूर्त्त भर के लिये भी (इसे) छोड़ नहीं रही है । तात्पर्य यह है कि मेरा चित्त पहले मायामय उपायों में ही लगा रहता था, अतः स्वात्म-संवित् का दर्शन भी उसे मिलता नहीं था । अब तो शिव के अनुग्रह से मेरा चित्त सतत गति से स्वात्मसंवित् के आनन्दचमत्कारात्मक उपभोग में इतना मस्त रहता है कि मुहूर्त्त भर के लिये भी अन्य व्यवहारों में लगता ही नहीं ।

---

१. सभगमूर्जित—(घ)
२. तदद्य—(ग)

योगव्रतादिनियमैर्हठयोगाद्युपायैः स्मार्तैश्च व चान्द्रायणादि-व्रतैः शौचादिभिश्च वा पातञ्जलैर्नियमैः, अथवा श्रमणोचितैर्योगि-नियमैर्ब्राह्मणोचितैश्च कृच्छ्रचान्द्रायण-शिलोञ्छादिकष्टतपोमयै-र्नियमैरुपसेविता-आराधितापि संविदात्मिका प्रिया-प्रेयसी, यस्य मच्चित्तस्य दर्शनपथमपि कदाचिदपि न किलावाप, दर्शनानन्तरं लभ्यानां सङ्गमसुखानां तु वार्तैव न काचित्, यतो दर्शनमात्रमपि-तया संवित्प्रियया न दत्तम्। वस्तुतस्तथाविधा नियमाः-मायीयाः सन्तो मायोपरिवर्तिन्याः संविच्छक्तेर्दर्शनोपायतां नैव यान्ति। ततः प्राङ् मम चेतस्तेषूपायेषु लग्नं सदस्या दर्शनमपि नावाप्तवत्, परमिदानीमसौ संवित्प्रिया मदीयं चेतः सुभगमिति पश्यन्ती किञ्च तदूर्जितभाग्यसम्पदिति निरीक्षमाणा क्षणमेकमपि न तज्जहाति; सर्वकालं मदीयचित्तेन साकं सङ्गतैव तिष्ठति, एकं मुहूर्त्तमपि मे चित्तं त्यक्त्वाऽन्यत्र न गच्छति। 'यतस्तत् सुभगं तथोर्जिता-वृद्धिं गता, भाग्यसम्पद्यस्य तत् तथाविधं मन्यमाना तन्निरन्तरं सेवते। समासोक्त्यात्र संविदि नायिकात्वं चेतासि च नायकत्वमारोपितं कविना। ऊर्जितभाग्यता च परमेश्वरानुग्रहशक्तिपातपात्रता, गुरुकृतकृपापात्रता चेति। चित्तं च पूर्वं मायीये उपायजाले संलग्नं सदमायीयस्य स्वात्मसंवित्प्रकाशस्य साक्षात्कारपात्रं क्षणमपि नैव जातम्। इदानीं शिवानुग्रहेण सततं स्वात्मसाक्षात्कारचमत्कारे तथा लग्नं तिष्ठति यथा मुहूर्त्तमपि विकल्पात्मके मायीये व्यवहारे नैव प्रसरतीति तात्पर्यम्।

दुःखैकसार[1] इति भीम इति प्रयत्नात्
संसार एष किल यस्य बभूव हेयः ।
दिष्ट्या स एव परचिद्रससामरस्य-
सञ्जीवितः श्रयति तस्य विमुक्तिसाम्यम् ॥११॥

तर्कात्मक विचारों से जिस मेरे चित्त के लिए यह संसार केवल दुःखसार होने के कारण और भयानक होने के कारण हेय सिद्ध हुआ था, वही संसार जो अब परासंवित् के रस रूपी अमृत से सञ्जीवित किया गया तो उस से यह अब मेरे चित्त के लिये मुक्ति के समान ही आह्लादप्रद बन गया। तात्पर्य यह है कि अब मेरा चित्त इस संसार को भी संविद्रूपतया देखता हुआ इसमें और मुक्ति में कोई भी अन्तर नहीं देख रहा है ।

एष संसारो दुःखैकसारो, दुःखमेवैकं सारं यस्य सः श्रमण-दर्शनदृशा, षड्दर्शनदृशा च भीम इति—त्रिविधतापात्मकत्वेन भयानकोऽयमिति कारणादेष संसारो यस्य मदीयस्य चित्तस्य कृते प्रयत्नात् हेयोपादेयताविवेकात्मकाच्छ्रमणोचिताच्च बौद्धाद् यत्नात् तर्कात्मकाद् हेयो ऽभूत् हेयतयैव सिद्धोऽभवत्, दिष्ट्या सौभाग्येन, स एव संसार एव, परेण पारमेश्वरेण, चिद्रसेन संविद्रसेन यत् सामरस्यं पराऽभिन्नता, तया सञ्जीवितः सन् परचिद्रूपतया विमृष्टः

(१) सारमिति (ख. ग)

सन् जडत्वं विहाय संविद्रूपतायां रूढः सन्, तस्य मदीयस्य चित्तस्य कृते विमुक्त्या साकं साम्यं श्रयति, दिष्ट्या संसारोऽप्यस्येदानीं मोक्षायते

मोक्षायते च संसारो यत्र मार्गः स शाङ्करः ॥ (शि. स्तो. २—१२)

इति श्रीमदुत्पलदेवोक्त्यनुसारमस्य सर्वमपि व्यवहारजातं लौकिकमपि मोक्षायते । यतः सर्वत्र चित्तं स्वात्मपरमेश्वरं पश्यदानन्दचमत्कारैकपरवशं भवति ।

तृष्णाकरालकरवालविलुप्यमानं
यद्विस्मृतात्मविभवं कृपणं बभूव ।
उच्चैरकिञ्चनतयापि तदद्य चेतः
स्वात्मावमर्श[1]-परहर्षमुदारमास्ते ॥१२॥

तृष्णा रूपिणी भयानक तलवार से खाया जाता हुआ मेरा चित्त पीछे अपने परमेश्वरतात्मक वैभव को भूलकर अतीव अनुदार बना हुआ था। अब तो अत्यन्त निर्धनता की अवस्था में भी वह अपने शिवस्वरूप के विमर्श से होने वाले परम आनन्द से युक्त होता हुआ अतीव उदार बन कर आनन्द में विश्रान्ति ले रहा है।

तृष्णैव करालो भयानकः करवालः खड्गस्तेन विलुप्यमानं

१. स्वावमर्शः (घ)

क्षयं नीयमानं, विस्मृतो मायावशेन न विभ्रष्टुं शक्य आत्मनः-स्वात्मपरमेश्वरस्य विभवो वैभवमैश्वर्यं येन तन्मदीयं चेतो यत् पूर्वं कृपणं दरिद्रं दयार्हञ्च बभूव, उच्चैरत्यन्तम्, अकिञ्चनतयापि, निर्धनतायां सत्यामपि तदेव मे चेतोऽद्य स्वात्मनो यो विमर्शः परि-पूर्णपरमेश्वरात्मकोऽहमिति विमर्शस्तेन परः हर्षः परमः आनन्दो यस्य तदुदारं दानशौण्डं विशालदृष्टि च आस्ते सुखं तिष्ठति।

कस्योर्जितस्य सुकृतस्य फलं तदेतत्
पुण्योदयस्तव कुतोऽयमनन्यलभ्यः।
संविच्छ्रिया गलितभेदविकल्पया यद्
एकं मुहूर्त्तमपि नैव विमुच्यसे त्वम् ॥२३॥

हे मेरे चित्त! तू ज़रा बता तो दे कि यह किस शक्तिशाली धर्म कृत्य का फल तुझे मिला है और ऐसा उत्कृष्ट पुण्यफलोदय तुझे किस उपाय से हुआ जो और किसी को कभी हो नहीं पाता कि संवित्लक्ष्मीरूपिणी यह प्रेयसी जिसके चित्तसे भेदमय विकल्प पूरी तरह से गल ही गये हैं, अर्थात् जो निर्विकल्पभाव से सर्वथा एकचित्त हो गई है, वह एक मुहूर्त्त भर के लिए भी तुझे कहीं छोड़ ही नहीं रही है।

हे मम चित्त! ब्रूहि कस्य ऊर्जितस्य महाशक्तिशालिनः सुकृतस्य धर्मस्यैतत् फलम्? अयमनन्यलभ्यस्तव पुण्योदयः कुतः

कस्मादुपायाज्जातो । यद् गलितो भेदमयो विकल्पो यस्यास्तया सर्वथा निर्विकल्पया संविच्छ्रिया संविद्रूपिण्या लक्ष्म्या, व्यञ्जनयाऽनन्य-संलग्नचिन्तया उत्तमया नायिकयेति समासोक्तिः । तथाविधया तया त्वमेकं मुहूर्त्तमपि नैव विमुच्यसे, सततमेव तत्समागमानन्द-चमत्कारचर्वणापरमसि; त्वं व्यवहारजाले प्रवर्तमानमपि सततमेव स्वात्मपरमेश्वरात्मिकायां संविद्येव प्रतिष्ठितमसीति तात्पर्यम् ।

स्वंचित्तं सम्बुद्धय प्रोक्तं पद्यमेतत् ।

वर्तामहे[1] क्वचन नाम न चित्त दिष्ट्या
वर्धामहे वयमहो मुदिता भवामः ।
यत्त्वां सखे ! परनिरुत्तरशैवसम्पत्-
सम्भोगमन्थरतरं परिलोकयामः[2] ॥१४॥

हे चित्त ! हमारा तो पैर ही कहीं टिकता नहीं, हमारी बहुत बधाई हो रही है और हम आश्चर्य-पूर्वक अतीव प्रसन्न हो रहे हैं, जब कि हे मित्र, तुम्हें सर्वोत्तीर्ण उत्कृष्टतर शैवी सम्पदा रूपिणी प्रेयसी के समागम सुख में विशेषतया मस्त पडे हुए को देख रहे हैं ।

हे मम चित्त ! वयमिदानीं क्वचन नाम न वर्तामहे हर्ष-

(१) वार्तामहे—(घ)
(२) परलोकयामः—(क)

विवशत्वेन चञ्चलीभूताः क्वापि निश्चेष्टा न तिष्ठामः "रोटान छि न कुनि" इति काश्मीरभाषोक्त्यनुसारमितस्ततः स्पन्दमानाः स्मो वयम्, दिष्ट्या च वयमतीव वर्धामहे। किञ्च नितरां मुदिता भवामो वयम्। एतस्य सर्वस्यास्माकं हर्षस्यैतदेव कारणं यद् हे अस्माकं सखे! वयं त्वां परा सर्वोत्कृष्टा, निरुत्तरा चानुत्तरपरशिवात्मिका या शैवी सम्पत्, परं पारमैश्वर्यं, तद्रूपायाः प्रेयस्याः यः सम्भोगः—जगदानन्दरसचमत्कारचर्वणा समासोक्तिनीत्या च प्रेयसीसमागमसम्भोगशृङ्गारानुरूपं रतिसुखम्, तेन मन्थरतरम्-अतीवमन्थरं शैथिल्ययुक्तं परिलोकयामस्त्वाम् तथा परितः पश्यामः। त्वां तथाविधसुखसम्भोगमन्थरं पश्यतामेवास्माकमेतत् परहर्षविवशत्वम् ॥

ध्यानेऽर्चनेऽपि च[1] कदाचन काञ्चनापि
कुत्रापि निर्वृतिदशां[2] बत यन्न[3] लेभे।
दिष्ट्या निमग्नमपि संव्यवहारमध्ये
चेतस्तदद्य[4] न विमुञ्चति पारिपूर्ण्यम् ॥१५॥

जिस मेरे चित्तको पहले ध्यान में; पूजन में, तथा इस प्रकार की अन्य साधनाओं में भी कहीं भी, कभी भी, जरा भर भी शान्ति

---

१. नकदाचन (क) (ख) (ग)
२. निर्वृतिदशा—(ग)
३. यत्र (क. घ.)
४. तदद्य—(ग)

को दशा प्राप्त नहीं हुआ करती थी, सौभाग्य की बात है कि अब वही मेरा चित्त लोकव्यवहार में निमग्न रहता हुआ भी कभी भी अपनी परिपूर्णता को छोड़ ही नहीं रहा है।

यन्मम चेतः प्राग् ध्यानेऽर्चनेऽपि च उपलक्षणमेतदुपासनान्तराणां जपहोमधारणासमाधिप्रभृतीनां, तदेतैरुपायैः कदाचनापि काञ्चनापि निर्वृतिं शान्तिं कुत्रापि नैव लेभे, तदेव मे चेतोऽद्य संव्यवहारमध्ये निमग्नमपि, विलीनं सत्सुविक्षिप्तमपि सद्, दिष्ट्या सौभाग्येन कदाचिदपि निजं पारिपूर्ण्यम् परिपूर्णपरमेश्वरभावं नैव मुञ्चति, व्यवहारमध्येऽपि स्वात्मपरमेश्वरलीलाचमत्काररसमेव सदा सर्वत्र रसयति इति।

सर्वेषु चित्तमधुपो विषयद्रुमेषु
बभ्राम यः सततमस्ति[1]मिताभिलाषः।
दैवादवाप्य परमेश्वरपारिजातं
तृप्तो विलीन इव मुञ्चति चञ्चलत्वम्॥१६॥

जो मेरा चित्त रूपी भौंरा कभी मन्द न होने वाली अभिलाषाओं से प्रेरित होता हुआ सभी ही विषय वृक्षों पर मण्डराता रहता था, वही अब सौभाग्य से परमेश्वर रूपी पारिजात

---

१. मस्तमिता (क.ख.ग.)

वृक्ष को पाकर तृप्त हो गया है और उसी में मानो विलीन हो कर अब सारी चंचलता को छोड रहा है।

यो मे चित्तमधुपः सततमेवास्तिमितो न मन्दीभूतोऽभिलाषो यस्यासौ तथाविधः सन् सर्वेष्वपि विषयद्रुमेषु बभ्राम, तत्र मण्डलायतेस्म, सोऽधुना दैवात् पारमेश्वरादनुग्रहात् परमेश्वररूपं पारिजातं, सर्वकामपूरकं परिपूर्णं स्वात्मसंवित्स्वरूपं समवाप्य तृप्तो भूत्वा, कृतकृत्यतावशात् तत्रैव स्वात्मशिवतायां विलीनः इव सन् चञ्चलत्वं क्षुद्र-भोगलोलुपत्वम् अशुद्धविकल्प-परम्परात्मकं च विक्षेपं मुञ्चति परित्यजति। व्यवहारं कुर्वन्नपि स्वात्मसंविद्विश्रान्तो भवतीति न सर्वथा तत्र लीयते। इति जीवन्मुक्तिरेषा, नाशरीरमुक्तिः अत एव विलीन इवेति, न सर्वथा विलीन इति।

यैरिन्द्रियैरति[1]वशीकृतशक्ति चेतः
पूर्वं कदर्थितमभूरहितैरिवोच्चैः।
स्वच्छानिकेतपरचिद्रससंविभक्तै-
र्दिष्टयाद्य तैरनुचरैरिव राजसे त्वम् ॥१७॥

हे हमारे चित्त, जो इन्द्रियां तेरी शक्ति को बहुत अधिक वश में करके तुम्हें घोर शत्रुओं की तरह पीछे अतीव कष्ट देती

१. रसिवशीकृत—(क, ख, ग, घ)।

रहीं, उन्हीं इन्द्रियों को जब अतीव निर्मल, देश काल कृत सीमा से रहित, अनुत्तर संवित् का रस प्राप्त हो गया, अर्थात् जब वह भी परिपूर्ण संविद्रूप ही अनुभव में आने लगीं, तो सौभाग्य से अब वे तुम्हारी दासियां जैसी बन गईं और उन पर प्रभुत्व जमाता हुआ तू अब खूब शोभा पा रहा है।

हे मम चेतो यैश्चक्षुरादिभिरिन्द्रियैः पूर्वमतिवशीकृतात्यन्तं स्वायत्ततां नीता शक्तिर्यस्य तस्य सम्बुद्धौ वशीकृतशक्ति इति। एवमेतैर्वशीकृतं सदुच्चैर्बलवद्भिरहितैरिव-शत्रुभिरिव, त्वं पूर्व कदर्थितमभूः, स्वच्छेन-निर्मलेनानिकेतेन च स्थानरहितेन परेण-अनुत्तरेण, चिद्रसेन-संविच्चमत्कारेण, संविभक्तैः-तद्रूपतां प्राप्तैस्तच्चमत्कारभोगतुष्टैस्तैरिन्द्रियैरिदानीम्, दिष्ट्या सौभाग्येन, अनुचरैरिव-किङ्करैरिव, सेव्यमानं सत्त्वं, नितरां राजसे शोभायमानं तिष्ठसि।

चिन्तां ततान करुणं प्रललाप पूर्वं
यत्सङ्कुचत्स्थिति भयं रविजाद्विचार्य।
चेतस्तदद्वयमिदं निजरूपमीक्ष्य
दिष्ट्याद्य निर्भयममन्दमुदात्तमास्ते ॥१८॥

यमराज से लगने वाले मृत्युभय का विचार करते हुए जिस मेरे चित्त की स्थिति ही पहले सङ्कुचित हो जाती थी, अर्थात् मृत्यु

भय से जो चित्त सिकुड़ सा जाता था, तथा बहुत चिन्ता में मग्न हो जाता था और अतीव दुःख पूर्वक विलाप करता रहता था, वही मेरा चित्त अब अपनी अद्वैत परमेश्वरता को साक्षात् देखकर सौभाग्य से निर्भय बन गया है, शक्तिशाली तथा उदार बन गया है और सुख पूर्वक विश्रान्ति ले रहा है।

यन्मदीयं चेतः, रविजात्-यमराजाद्, भयं विचार्य मरणत्रासं विमृश्य, पूर्व-प्राक्, सङ्कुचत् स्थिति सङ्कुचन्ती कालिकेनावच्छेदेन सीमिता भवन्ती स्थितिर्यस्य तत् चिन्तां ततान विस्तारयामास अतीव चिन्ताकुलमभवत्, करुणञ्च प्रललाप दुःखमयान् प्रलापानकरोत्, तदेव मे चेतः, इदं साक्षात्क्रियमाणमद्वयं निजं रूपं एकमात्र-पारमेश्वरसंविदात्मकं स्वात्मानं वीक्ष्याद्य दिष्ट्या सौभाग्येन, निर्भयम्-अमन्दमुदारञ्चास्ते सुखासीनं भवति। अमन्दत्वेनानवच्छिन्नशक्तित्वं प्रतिपाद्यते। सौभाग्यं चात्र पारमेश्वरोऽनुग्रहशक्तिपातः इति।

नित्यं यदेतदभवद्विफलप्रयासं
हेवाकदुर्ललितमप्रथितात्मभावम्।
संवित्सुधारसचमत्कृतिघूर्णमानं[१]
दिष्ट्या तदद्य नितरां स्पृहणीयमास्ते ॥१९॥

जिस मेरे चित्त के अनेकों यत्न प्रायः सदैव ही निष्फल

१. पूर्णमानम् (क)

हुआ करते थे और जो विविध भोगों को भोगने की तीव्र शौकीनी से सदा आविष्ट होकर ही रहता था, तथा जिसे अपने वास्तविक स्वरूप का ज्ञान कभी परिपक्व हुआ ही नहीं था, वही यह चित्त अब संविद्रूपी अमृत के रस के चमत्कार के आस्वाद से चकराता हुआ सौभाग्य से अत्यन्त स्पृहणीय दशा को प्राप्त करके आनन्द से विश्राम ले रहा है।

यन्मदीयं चेतो नित्यमेव प्रायो विफलप्रयासम् निष्फल-प्रयत्नमभवत्, तथैहामुष्मिकभोगहेवाकैर्दुर्ललितं हठतस्तत्तद्भोग-लोलुपम्, अप्रथितो हृदयङ्गमतामप्राप्त आत्मनो भावः सत्ता स्वरूपमिति यस्य तत् तथाविधम्, अप्रत्यभिज्ञातस्वात्मस्वरूप-मभवत् पूर्वम्, तदेवाधुना संविद्रूपिणी या सुधा तस्याः यो रस-स्तदास्वादेन या चमत्कृतिस्तया नित्यं घूर्णमानं नित्यञ्च स्पृहणीयं सद् दिष्ट्या शिवानुग्रहशक्तिपातरूपया गुरुकृपया चास्ते सुखासीनं तिष्ठति।

चिन्ताशताकुलतरं न रतिं कदाचिद्
भीतं भवादभजतैकमपि क्षणं यत्।
चेतश्चिदात्मकमिदं सकलं विलोक्य
सुप्तप्रबुद्धमिव निर्वृत[1]रूपमास्ते ॥२०॥

जो संसार से डरा हुआ मेरा चित्त पहले सैकड़ों चिन्ताओं

१. निर्वृतिरूपम् (क)

से व्याकुल बना हुआ कभी भी क्षण भर के लिये भी सुख पूर्वक शान्तभाव में नहीं रहता था; अब इस समस्त विश्व को ही स्वात्म-संवित् के ही रूप में देखकर वही मेरा चित्त मानो गहरी नींद से जाग उठा है और सर्वथा शान्त भाव में विश्राम ले रहा है।

यन्मम चेतः भवात्संसाराद् भीतं सत्त्विन्ताशतेनाकुलतरमत्यन्तव्याकुलं च सदेकमपि क्षणं कदाचिदपि रतिं सुखं नाभजत, तदेवेदं चेतः सकलमेवेदं जगच्चिदात्मकं संविदात्मकं विलोक्य दृष्ट्वेदानीं सुप्तप्रबुद्धमिव निर्वृतरूपं शान्तरूपमास्ते सुखेन तिष्ठति।

वन्दामहे[1] (वर्धामहे) किमु नुमः किमु गौरवेण
हर्षेण चित्त किमु नाम नि[2]पीडयामः।
सम्प्राप्त[3]दुर्लभमहोदयशैवसम्पत्
त्वां कौतुकेन किमु मित्र विलोकयामः॥२१॥

हे चित्त! बताओ कि क्या हमारी बधाई हो, क्या हम तुम्हें नमस्कार करें, क्या आदर पूर्वक तुम्हें प्रणाम करें, क्या हर्ष के आधिक्य से फूट जाएं, क्या अतीव कौतुक से तुम्हें देखते ही रहें कि तूने महोदय रूपिणी दुर्लभ शैवी सम्पदा को पा लिया है।

---

१. वर्धामहे इति शोभनतरः संशोधितः पाठः।
२. न निपीडयामः (क. घ)
३. सम्प्राप्य (क)

हे मम चित्त ! तव महोदयं दृष्ट्वा ब्रूहि किं वयं त्वां वन्दामहे, अथवा किं वयं वर्धामहे-दिष्टयेति शेषः "वन्दामहे" इति पाठे नुमः हत्यनेन आर्थी पुनरूक्तिः, "वर्धामहे" इति पाठे तन्निवारणम्, किंवा गौरवेण सत्कारेण त्वां नुमः, किम्वा हर्षेण—हर्षातिरेकेण किं निपीडयामः, तत् स्वात्मनि परिमातुमसमर्थाः सन्तः किं स्फुटिता भवामः, सम्प्राप्ता दुर्लभा चासौ महोदयरूपा चेति तद्रूपा शैवी सम्पद् येन तत्-तथाविधं त्वां हे मित्र किं वयं कौतुकेनाश्चर्यपूर्वकमौत्सुक्येन विलोकयामः, त्वां तथाविधं दर्शं दर्शं किमाह्लादिता भवामः इति प्रश्नपरम्परा, तथा विधस्वचित्तदशादर्शनेन यो हर्षातिरेकोऽसावत्र व्यङ्ग्यः।

आपृच्छ्यता[1]मियमनादिघना[2]ऽप्रबोध[3]-
स्नेहानुविद्धहृदया[4] हृदयाद्य माया ।
संसेव्यतां सुभग-शैव-पद-प्रवेश-
सम्प्राप्त-दुर्लभ-महोदय मुक्ति-लक्ष्मीः ॥२२॥

हे मेरे हृदय ! आप इस समय इस माया से भी ज़रा पूछिये कि अब यह क्या कहती है जिसे अनादि और घने अन्धकार (अज्ञान) के साथ ही बड़ा स्नेह था और जिसके हृदय में वह स्नेह

१. आपृच्छताम् (ख.ग.)
२. घनप्रबोध (क. ख. ग.घ,)
३. प्रबन्ध (घ)
४. हृदयात् (ख.ग)

भी खूब सना हुआ था। फिर आप अत्यन्त रमणीय शैवी सम्पदा की भूमिका में प्रवेश करने से प्राप्त हुई दुर्लभ महोदय रूपिणी इस मोक्षात्मिका लक्ष्मी का भी यथेष्ट उपभोग कीजिए।

हे मदीय हृदय! अनादिना, अज्ञातारम्भेण घनेन निबिडेन दुर्भेदेन अप्रबोधेन-अज्ञानेन साकं यः स्नेहस्तेनानुविद्धहृदया अनुस्यूत-हृदयेयं माया या अनादिकालात् त्वां मोहावर्ते भ्रामयन्यभूत् साद्य तावदापृच्छ्यताम्—अनया सहापि वार्तालापो विधीयतां श्रूयतां चेदानीं किं किं कथं वदति, भग्नेषु सर्वेष्वेतस्याः प्रभावेषु हतोत्साहयाऽनयेदानीं विजयवार्तालापो विधीयताम्। किञ्च सुभगा अत्यन्तमाह्लादप्रदा या शैवी सम्पत् परमेश्वरभावे स्थितिस्तदन्तर्यः प्रवेशस्तेन सम्यक् प्राप्तोऽतिदुर्लभो यो महोदयः स्वात्मपरमेश्वरताप्रत्यभिज्ञा, तद्रूपा या मुक्तिलक्ष्मीर्जीवन्मुक्तताविभूतिः सा सम्यक् सेव्यताम्, तस्याः सेवनेनानन्दचमत्कारचर्वणया कृतकृत्यतायाः साक्षादनुभवो विधीयताम्।

किं ब्रूमहेऽत्र भवते सुकृतेन सत्ये
सर्वाशिषामविषये ननु वर्तसे त्वम्।
यत् कारणातिगतनिर्मलनिर्विकल्प-
स्वच्छन्दशङ्करपदे भजसेऽनुरागम् ॥२३॥

हे मेरे मन! हम आपको क्या कहें। आप तो इस समय

सौभाग्य से उस सत्य स्थिति में ठहरे हुए हैं जो सभी अशीर्वादों से भी परे ठहरी हुई है, क्योंकि आप अब ब्रह्मा आदि पांच कारणों से भी उत्तीर्ण निर्मल और निर्विकल्प सर्वथा स्वतन्त्र परमेश्वरात्मक परमशिव पद के साथ अनुराग कर रहे हैं।

हे मम चिन्त्त! वयमत्रभवते-तुभ्यं, किं ब्रूमहे, किमपि त्वद्-विषये वक्तुं विकल्पयितुमपि वा न वयं समर्थाः। यतः सुकृतेन-पारमेश्वरानुग्रहशक्तिपातप्रेरितगुरुवरकृपात्मकेन पुण्येन, त्वं सर्वाशिषामप्यविषये सत्ये वर्तसे, तस्मिन् सत्ये वर्तसे यन्न विकल्पकल्पनीयम्, ततो नाप्यभिलाषविषयतां नाप्याशीर्वचन-विषयताम् नेतुं शक्यम्। अत्र भवते इति पदद्वयं वा, अत्र स्थितौ भवते वयं किं ब्रूमहे, न किमपि ब्रवीतुं समर्थाः इति। सर्वा-शिषामविषयत्वमेव तस्य सत्यस्य प्रतिपद्यत एवम्-कारणानि पञ्च, षड्वा, पारमेश्वरकारणशरीराणि। तद्यथा-ब्रह्मा, विष्णुः रुद्रः, ईश्वरः सदाशिव इति पञ्चकारणानि, षष्ठञ्चानाश्रितशिवा-ख्यम्। यतस्तदेतेभ्यः कारणेभ्योऽप्यतिगतं-कारणषट्कोत्तीर्णं, निर्मलं, सर्वथा, सर्वतः, सर्वदाच संविन्मात्रशरीरं, परिपूर्णं, निर्विकल्पं, विकल्पज्ञानाविषयं, सदा स्वप्रकाशेन प्रकाशमानं सर्वतः, स्वच्छन्दं सर्वथा परिपूर्णतया च स्वतन्त्रं. शङ्करपदं-समस्तामङ्गल-शमनकारि परमेश्वरताख्यं पदं परशिवात्मकं तत्र हि त्वमनुरागं भजसे सेवसे। तदनुरागचमत्कारचर्वणोपभोग-भागसि। इत्थं निजहृदयाश्वासनमिदम्। यतस्त्वमेवं विधस्तत एव सर्वाशिषामविषये वर्तसे इति।

चित्रं तदेतदसमं यदभूत् सुखेषु
प्राप्तेषु निर्वृतिदशामनुवर्तमानम् ।
दुःखेषु[२] दुःसहतरेष्वपि चित्तमद्य[३]
पूर्णप्रमोदरसनिर्भरमेतदास्ते ॥२४॥

यह एक अनुपम आश्चर्य की बात है कि पीछे इस मेरे चित्त को सुखों को प्राप्त करते हुए भी सन्तोष नहीं होता था और यह सन्तोषमयी आनन्द दशा को सदा ढूंढता ही रहता था, वही यह चित्त है जो अब अत्यन्त दुःसह दुःखों में भी परिपूर्ण आनन्द के रस से ही पूरी तरह से भरा ही रहता है।

तदेतदतीवचित्रं-विचित्रम्, असममिति नान्यत् किमपि तथाश्चर्यकारि । तच्चैतत्-यन्मे चित्तं पूर्वं सुखेषु प्राप्तेष्वप्यसन्तुष्टमनिर्वृतञ्च सन्निर्वृति-दशामनुवर्तमानमेव, तामन्विष्यदेव सदाऽभूत् । तदेव चित्तं दुःसहतरेष्वपि दुःखेष्वद्य पूर्णो यः प्रमोदः-आनन्दः तस्य यो रसस्तेन निर्भरमेव सदाऽऽस्ते सुखं तिष्ठति । पूर्वं सुखान्यपि नैव तुष्टिकराण्यभूवन्, परमिदानी दुःखान्यप्यानन्दायन्ते इति महदाश्चर्यमेतत् ।

---

१. यदेतत् (क.ख.ग)
२. दुखेषु (ग)
३. मध्य (ग)

विश्वं निगीर्य[1] सहसा कवलं विधाय
कालं प्रशान्तगगनोपमदिव्यमूर्तिः ।
या राजते निरुपमामृतपूरपूर्णा
सा कापि खेचरगतिर्जयति त्वदीया ॥२५॥

हे हमारे चित्त ! आप की वह खेचरी गति सर्वोत्कृष्ट है जो सारे विश्व को निगल कर तथा काल को भी सहसा ग्रास करके प्रशान्त आकाश के समान निर्मल और अद्वैत तथा दिव्यातिदिव्य किसी विचित्र स्वरूप में चमकती है और किसी अनुपम अमृत के प्रवाह से परिपूर्ण बनी रहती हुई विराजमान हो रही है ।

हे चित्त ! तव सा कापि खेचरगतिर्वोर्ध्वगगनान्तः-स्पन्दमाना खेचरी गतिर्जयति सर्वोत्कर्षेण वर्तते या सर्वं विश्वं निगीर्य स्वात्मसंविदेकरूपतामापाद्य सहसा च कालं कवलं विधाय, काल कलनां सहसा निमज्ज्य सर्वथाऽकालकलितां सकृद्विभाततां स्वात्मनः हृदयङ्गमीभावं नीत्वा प्रशान्तगगनोपमा दिव्या पारमेश्वर-संविदेकरूपा मूर्त्तिर्यस्याः सा, या च निरूपमस्य-अनुपमस्य, अमृतस्य पूरेण प्रवाहेण पूर्णा सती राजते दीप्यते सा तथाविधा तव कापि खेचरी गतिर्जयतीति ।

---

१. निगीर्य (ख.ग.)

ते कारणाधिपतयः प्रलयं प्रयान्ति
यस्मिन् महावटतटे[1] विषमे गभीरे[2],
शक्तिर्निजं वपुरपि प्रसभं जुहोति[3]
तद्धाम संश्रयसि वीरवर त्वमेकम् ॥२६॥

हे मेरे चित्त ! तू अकेला ही वीरसाधना में सर्वश्रेष्ठ है और उस परिपूर्ण संवित्तेज पर तू ठहरा हुआ है जो ब्रह्मा आदि पांच कारण रूपी अधिकारियों के लिए भी महाप्रलय के समय विलीन हो जाने के लिए एक अत्यन्त भयानक और अतीव गहरे गर्त्त का तट बनता है तथा जिस तेज के भीतर पराशक्ति भी सृष्टि आदि पञ्चकृत्यों के प्रति सततगतिशीलता रूपी अपने शरीर को भी हठपूर्वक एकदम स्वाहा कर देती है।

ते प्रसिद्धाः कारणरूपाः ब्रह्मद्याः पञ्चाधिपतयः प्राधान्येन सृष्टयादिपञ्चकृत्याधिकारे नियुक्ताः सन्तोऽपि यस्मिन् महतोऽवटस्य श्वभ्रस्य महाप्रलयरूपस्य महागर्त्तस्य विषमे—भयानके, गभीरे च तटे प्रलयं प्रयान्ति—परस्मिन् शिवशून्ये विलीना भवन्ति, सा शक्तिरपि च यस्मिन् परशिवपदे निजं सृष्टयादि पञ्चकृत्योन्मुखत्वं यत्तस्याः वपुः स्वरूपं तदपि सा यस्मिन् परिपूर्णपरशिव-

---

१. महातटवदे (घ)
२. विष गभीरे (घ)
३. जहाति (ख.ग.)

संवित्तेजसि, प्रसभं—बलात्कारपूर्वं हठपाकक्रमेण जुहोति—परशिवैक-रूपतामापादयति, हे वीरवर ! मदीय चित्त ! तत् तथाविधं धाम—शुद्धं संविदस्तेजस्त्वमेकमद्वैतरूपं संश्रयसि, तस्मिन् परिपूर्ण-संविन्मात्रप्रकाशे त्वं तिष्ठसि । अत एव त्वं वीरवरः । वीर साधनायां निष्णातेष्वपि वरः श्रेष्ठो वीरः ।

विद्युद्विलासचपले विभवे नताङ्गी-
भ्रूभङ्ग-भङ्गुरतरेऽपि च जीवनेऽस्मिन् ।
चित्त त्वयैव विजितं श्रयताऽविनाशि
दिग्देश-काल-कलनारहितं पदं तत् ॥२७॥

हे मेरे चित्त ! इस संसार में जो वैभव होता है वह तो बिजली की चमक की तरह चञ्चल होता है । फिर जो यहां का जीवन होता है वह भी सुन्दरियों के भ्रूभङ्ग से भी अधिक नश्वर होता है । फिर भी ऐसी स्थिति में केवल तूने ही सर्वोत्कर्ष को प्राप्त किया क्योंकि तूने उस स्थिति का आसरा लिया जो देश, काल, दिशा आदि की कलना से सर्वथा उत्तीर्ण तथा विनाश रहित परशिवात्मक पद है ।

विद्युतश्चञ्चलाया यो विलासः क्षणदृष्टनष्टत्वं तद्वच्चपले ऽस्थिरे विभवे—समृद्धावैश्वर्ये सति, किञ्च नताङ्ग्याः सुन्दर्याः

---

१. जीविते—(ख. ग.))

२. श्रयतां—(क) श्रयता विनाशि—(ख. ग.)

भ्रूभङ्गादपि भङ्गुरतरेऽधिकं त्वरितनश्वरेऽस्मिञ्जीवने च सति, हे मम चित्त ! त्वयैवैकेनात्र विजितं—विजयोऽवाप्तः । स एष विजयस्त्वया दिशां देशस्य कालस्य च याः कलनाः सर्वस्य परिच्छेदकारिण्यस्ताभी रहितं देशकालाकारानवच्छिन्नं तत् परिपूर्णं, विश्वोत्तीर्णं, परशिवात्मकमविनाशि सततोदितं सकृद्विभातञ्च पदं श्रयता—तत्र स्थितिं भजतावाप्तः ।

स्वस्त्यस्तु ते ऽम्बर[1]विकस्वरसम्प्रदाय-
सम्प्राप्त-शङ्कर-पदोदित-सम्मदाय ।
दुर्वार-संसृति-दशास्वपि निर्विकार-
नित्योदितात्मविभवाय भवाभवाय[2] ॥२८॥

हे मेरे चित्त ! आकाश के समान सुविशाल अद्वैत शैव सम्प्रदाय की साधना से प्राप्त हुई शिवमयी स्थिति से समुदित प्रहर्ष वाले आपका कल्याण हो । दुर्वार संसार दशाओं में भी सदा विकार रहित रहने वाले आपका (कल्याण हो) । नित्य ही उदित हुए—स्वात्म-ऐश्वर्य-वाले आपका (कल्याण हो) । फिर सदा के लिये उदित हुए अपने ऐश्वर्य वाले तथा शुद्धविद्या भूमिका स्वरूप आपका परम कल्याण हो ।

हे मम चित्त ! अम्बरवद्-आकाशवद् विकस्वरो विस्तीर्णो-

---

१. स्वरविकस्वर—(घ. क.)
२. भवाभयाय—(क)

ऽसीमो यः सम्प्रदायोऽद्वैतशैवसाधनाक्रमस्तेनोपायभूतेन सम्प्राप्तं—साक्षादनुभूतं यच्छङ्करपदं परशिवदशात्मकं पदं तेनोदितः सम्मदः-आनन्दः, कृतकृत्यतात्मको यस्य तस्मै तुभ्यं स्वस्त्यस्तु, किञ्च—दुर्वाराः याः, संसृतिदशास्तास्वपि सदैव निर्विकाररूपाय, नित्य-मेवोदितः—सततोदितः, सकृद्विभातः आत्मनः परशिवस्वरूप-स्य स्वस्य विभवः ऐश्वर्यं यस्य तस्मै भवाभवाय—शुद्धविद्या-स्वरूपाय भवते स्वस्त्यस्तु । बहूपकृतं भवता मम । तद् भवते स्वस्तिवागियम् । भवाभव इति च शुद्धविद्याया आगमिकमभि-धानम् ।

स्वच्छन्द-निर्मल-सदोदित-निर्निकेत-
संवित्-सुधा-रस-चमत्कृति-निर्भरोऽसि-
(निर्भरोऽस्मि) ।
दिष्टयाद्य सद्गुरुमुखाम्बुजमध्य[1]लब्धा[2]-
नुच्चार्य-चारुकथनोदय विस्मितो[3]ऽसि
(विस्मितोऽस्मि) ॥२९॥

हे शुद्ध विद्यात्मक मेरे चित्त! तू स्वतन्त्र, निर्मल और सदा उदित ही रहने वाली, किसी भी सीमा के भीतर न आने

१. मध्यलब्धा—(ख. ग.)
२. लब्धा—(ख. ग.)
३. विस्मितोऽस्मि—(घ)

वाली, जो शुद्ध संवित् है उसके अमृत के रस से होने वाले चमत्कारों से खूब खचाखच भरा हुआ है। सौभाग्य से सद्गुरु के मुख से प्राप्त, साधारण जनता को न कहने योग्य, रहस्यात्मक सुन्दर दीक्षात्मक वाणी के उदय से युक्त हुआ तू भी अब विस्मित हो गया है।

भवाभवं प्रागुक्तं प्रत्युक्तिरेषा। अत एव निर्भरोऽसि इति, विस्मितोऽसि इति च पुल्लिङ्ग प्रयोगः समीचीनः, अथवा घ इति पुस्तके दृष्टः विस्मितोऽस्मि इत्येष पाठः साधुः। तदनुसारं च निर्भरो सीति पदयोः स्थाने निर्भरोऽस्मीति पाठो युक्तियुक्तः। अथ श्लोको व्याख्यापते—हे भवाभवात्मक मच्चित्तदेव त्वं स्वच्छन्दा स्वतन्त्रा निर्मला आणवादिमलरहिता, सदोदिता सकृद्विभातत्वेन च सततं प्रकाशमाना, निर्निकेता स्थूल-सूक्ष्म-रूपाच्छरीरादुत्तीर्णा न नियतं तत्रैव कीलिता या शुद्धा पूर्णा च संवित् सैव सुधा, तस्या रसः—आस्वादः, तेन च या चमत्कृतिस्तया निर्भरोऽसि। चेद् भवाभवोऽत्र न सम्बुध्यते, अपितु चित्तमेव तदा निर्भरोऽस्मीति पाठः साधीयान् कवेरात्मानं निर्दिशेत्। किञ्च दिष्टया सौभाग्येनाद्य यत् सद्गुरोर्मुखाम्भोजं तन्मध्याल्लब्धमनुच्चार्यं न यस्य कस्यापि पुरतः उच्चारणीयं-यच्चारु-कथनं दीक्षात्मक उपदेशस्तस्योदयेन युक्त हे मच्चित्तात्मक भवाभव! शुद्ध विद्यास्थित मम चित्त! त्वमिदानीमेवंविधानुभववशाद्विस्मितोऽसि। अथवाऽहमेवैवंविधं त्वामवगत्य विस्मयाविष्टोऽस्मीति पाठः। तत एव प्राक्तने पद्ये तुभ्यमाशीर्वचनं प्रदत्तं मयेति। उक्तञ्च शिवसूत्रेषु—

विस्मयो योगभूमिकाः ॥

(शि. सू.—१—१२)

स्पन्देऽपि—

तमधिष्ठातृभावेन स्वभावभवलोकयन् ।
स्मयमान इवास्ते यस्तस्येयं कुसृतिः कुतः ॥

(स्पं. का—११)

भवमरुभुवि श्रान्तो मोहाद् य एष मनोऽध्वगो
विषम-विषय-प्रोद्यत्तृ[1]ष्णा-निवेश-वशीकृतः ।
शिव-पद-सुधा-सिन्धुं दैवादवाप्य स सादरं
किमपि सुखितो[2]मज्जं मज्जं[3] निमज्जति
॥३०॥

मोह के कारण संसृति रूपिणी मरुस्थली में थका हुआ जो यह मेरा मन रूपी पथिक बहुत उल्टे विषयों के प्रति उदय को प्राप्त करती हुई तृष्णा के सन्निवेश के द्वारा पीछे अपने वश में लाया गया था, वही यह मनरूपी पथिक अब दैवयोग से शिवभाव की अवस्थारूपी अमृत के समुद्र को प्राप्त करके कुछ सुखी होकर इसी में गोते लगाते-लगाते अब इसी में डूब रहा है ।

---

१. प्रोद्यत्—(ग)
२. सुखिनो—(ख. ग.)
३. मज्जं निमज्जति—(घ)

भवः संसारः, स एष मरुभूः—मरुस्थली, तत्र मोहात् कारण-भूताद् भ्रमणेन श्रान्तो य एष मनोध्वगो चित्तरूपः पान्थः स विषमाणां भयानकानां विषयाणामर्थे प्रोद्यन्ती—प्रकर्षेणोदयं प्राप्नुवती येयं तृष्णा तस्याः निवेशेन—मनस उपयर्वस्थानेन वशीकृतः स्वायत्तीकृतो मनोध्वगो दैवात्—पारमेश्वरानुग्रहशक्तिपातरूपात् सादरं शिवपदरूपं, सुधासिन्धुम्—अमृतसमुद्रम्, अवाप्य प्राप्य, किमपि सुखितः सन्नधुना तत्र मज्जं मज्जं पौनः पुन्येन तत्र मज्जनं कुर्वन् साम्प्रतं तत्रैव निमज्जति—तत्र विलीनो भवति।

वृत्तमत्र—हरिणी। अग्रे चानुस्टुप्॥

निरावरण-चिद्व्योमपरमामृत-बृंहितः।
नागाभिधो व्यधादेनां चित्तसन्तोषत्रिंशिकाम्[1]
॥३१॥

मायाकृत आवरण से शून्य जो संविद्रूपी आकाश है उसमें लभ्य सर्वोत्कृष्ट अमृत से पूरी तरह सने हुए और भरपूर बने हुए नागार्जुन आचार्य ने इस चित्त-सन्तोष-त्रिंशिका नामक काव्य की रचना की।

निरावरणम्—मायाख्यावरणरहितम्, यच्चिद् व्योम—संविदाकाशं, तदेव परममुत्कृष्टममृतं तेन बृंहितः परिवर्द्धितो नागाभिधो-

१. नागाभिधानस्तदिदं चित्तसन्तोषकं व्यधात्—(घ)

नागार्जुनाभिधानः—आचार्यः, एनाम्-उपरि लिखिताम्, चित्त-सन्तोषत्रिंशिकाम्—एतत्संज्ञं खण्डकाव्यम्, यच्चित्ताय कृतकृत्यता-विमर्शात्मकं सन्तोषं ददातीति तद् व्यधात् निर्मितवान् ।

इति श्री महा माहेश्वराचार्यवर्य श्रीनागार्जुनविरचिता चित्त-सन्तोष-त्रिंशिका ।

श्री महा माहेश्वर आचार्यवर श्रीनागार्जुन के द्वारा विरचित चित्त सन्तोष त्रिंशिका यहां पूरी हो गई ।

---

१. इति विपश्चिद्वरनागार्जुनविरचिता चित्तसन्तोषत्रिंशिका—(ख. ग.)
इति श्रीमहामाहेश्वर श्रीनागविपश्चिद्वरविरचिता चित्तसन्तोषत्रिंशिका । इति शम्—(घ)।

काश्मीरशैवत्वं ग्रन्थकर्तुः

त्रिंशिकाद्वयस्याप्यस्याध्ययनत एतत् स्पष्टं प्रतिभाति यदेतद्रचयिता कश्चन शैवो योगी न माध्यमिको नापि वज्रयानीयो बौद्धः । बौद्धास्तावच्छ्रमण-मार्गपक्षपातिनः । अत्र त्रिंशिकाद्वये श्रमणोचितस्य साधनाक्रमस्य वा श्रमणप्रियाणां दर्शनसिद्धान्तानामपि वा न किमपि दिग्दर्शनं क्वचिदपि लभ्यते । द्वयेऽप्यत्र शैवशाक्तोभयरूपा तान्त्रिकी साधनाप्रक्रिया यत्र तत्र निर्दिष्टास्ति । वज्रयानसम्प्रदायोऽपि सत्यं तान्त्रिक एव । परं तत्र तन्त्रविद्यामुपजीवद्भिराचार्यैः सिद्धान्तद्वयं सावधनतया निवारितम् । तत्रैकः जगतः कृत्यानां प्रेरकत्वरूपेण प्रशासकत्वरूपेण च स्थितस्य पूर्णस्य परमेश्वरस्य स्वतः निद्धायाः सत्तायाः सिद्धान्तः, अपरश्चान्तःकरणाधिष्ठातुः नित्यस्य संविद्रूपस्यात्मनः सत्तायाः सिद्धान्तः । एतत् सिद्धान्तद्वयं सर्वैरपि तान्त्रिकैर्बौद्धगुरुभिर्यत्नेन निवारितम् । परमत्रोभयमपि स्वीकृतमनेन गुरुणा ।

तथाहि ब्रह्मादि-पञ्च-कारणोपरि स्थिता पराशक्तिरपि यत्र पारमेश्वरे चिदग्नौ स्वात्मानं जुहोति स एव पारमेश्वरश्चिदग्निः-साधकेनाश्रयणीय इति प्रतिपादितं चिन्तसन्तोषत्रिंशिकाया षड्विंशे पद्ये "ते कारणाधिपतयः" (चि. सं त्रि. २६) इत्यादौ ।

आनन्दमय्याः संविदः, शैवशास्त्रे आत्मेति मतायाः जाग्र-

दादिभिरनावृतता वर्णिता परमार्चन-त्रिंशिकायां पञ्चदशे पद्ये "इन्द्रियेषु विषयानुवर्तिषु" इत्यादौ। चित्तादुत्तर्णायाः स्वात्म-रूपायाः संविद एव विश्वात्मत्वेन पारमैश्वर्यमपि स्पष्टमुक्तम्—"भावसञ्चय विमुक्त विग्रहा" (प० अ० त्रिं०—२७) इत्यादौ।

किञ्चाद्योपान्तं यद्वातावरणं सम्भृतं त्रिंशिकाद्वयेऽपि तन्न बौद्धं, नापि वैष्णवं नचापि वैदान्तिकम्, अपितु शैवमेव।

नवधात्वेन प्रसिद्धायाः वैष्णव्याः भक्त्या वा, अहोरात्रव्यापिन्याः भगवदर्चाया वा नामाप्यत्र न क्वापि लभ्यते। न च सालोक्य-सामीप्यसारूप्य-सायुज्यात्मकत्वं प्राप्यत्वेन प्रकीर्तितं क्वापि। ततो नैष नागार्जुनो वैष्णवो नापि शिवविशिष्टाद्वैतवादी वा, शिवभाग-वतो वा। जगतः सृष्टिसंहारादिकस्यात्र संविदः सुन्दरलीलात्मकत्वं, विवर्तस्यापि च तथात्वं, सर्वस्य चास्य स्वात्मशक्तिलीलामयत्वम्

"शाश्वतवीचिचय-सिन्धु-सन्निभाम्" "शक्तिचक्रपरमाधिदेवताम्"

(प अ०त्रिं० २१—२२)

इत्यादिपद्याभ्यां स्पष्टं वर्णयता कविना स्वात्मनः शैवत्वं सुस्पष्टीकृतम्। नात्र क्वाप्यविद्याकृतत्वं प्रपञ्चस्योक्तम्। न चापि साधनचतुष्टयस्य महत्त्वं निर्दिष्टम्। ततो नायं कविर्वेदान्ति-को यतिरपितु शैव एव सिद्धः।

भारतीयदर्शन-विद्यायां मुख्याश्चतस्रो दार्शनिकदृष्टयः समुल्लसन्ति। तत्र षड्दर्शनेषु प्रायः ब्राह्मण्यदृष्टिः प्रकाशते, या श्रुतिस्मृतिमूला वर्णाश्रमक्रमानुयायिनी च। बौद्धार्हतदर्शनेषु

श्रमणदृष्टिः प्राधान्यं लभते । असाववैदिकी, ब्राह्मण्यविरोधिनी, कर्मकाण्ड-खण्डनपरा, अनीश्वरा च । वैवर्तिकैर्वेदान्तिभिरप्यंशतो ऽसौ परिगृहीता । वैष्णवानां दृष्टिर्भक्तिप्रधाना ब्राह्मार्चाप्रशंसिनी वेदशास्त्राविरोधिनी च । चतुर्थी दृष्टिस्तावत् सिद्धानाम् । आगमशास्त्राश्रितैषा । एतस्यां शिव-शक्त्युपासनायाः, तान्त्रिक-साधनायाश्च सुमहान् प्रसारः । श्रुतिस्मृत्यविरोधिन्यपि सिद्धानां दृष्टिरेषा श्रौतं स्मार्तञ्च दर्शनं वालेभ्य एव हितं नाध्यात्मक्षेत्रे प्रौढेभ्यः-इत्युपादिशति ।

उक्तञ्चागमशास्त्रे—

वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम् ।
ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम् ।। इति

नरर्षिदेवद्रुहिण-विष्णुरुद्राद्युदीरितम् ।
उत्तरोत्तरवैशिष्ट्यात् पूर्वपूर्वप्रबाधकम् ।। इति च

गर्भाधानादथारभ्य यावदुद्वाहमेव तु ।
तावत्तु वैदिकं कार्यं पश्चाच्छैवे ह्यनन्यभाक् ।। इति च

अन्तः कौलो बहिः शैवो लोकाचारे तु वैदिकः ।
सारमादाय सन्तिष्ठेन्नारिकेलफलं यथा ।। इति च

एष सिद्धानामुपास्तिमार्गो भक्तिज्ञानयोगसङ्घट्टनात्मक-स्तान्त्रिको मार्गः । तत्र ज्ञानेन वास्तविकस्य वस्तुतत्त्वस्य निर्णयो विधीयते बुद्धिभूमिकायाम्, योगेन तस्य निर्णीतस्य तत्त्वस्य साक्षा-दनुभूतिर्हस्तगता क्रियते । भक्त्या च तज्ज्ञानं सा च यागजा-नुभूतिर्हृदयङ्गमतां तथोपनीयते यथाध्यात्मिकमजीर्णं साधकस्य न भवेत् । योगमार्गे ये विघ्ना उपस्थिता भवन्ति घोरतरशक्तिव्रात-प्रभावतस्तेषां विघ्नानां निवारणे उपशमने चापि भक्तिरुपायतामुप-

याति। परमेश्वरोऽनुग्रहशक्तिपातो यः सिद्धगुरुभि-र्मोक्षस्य मूल-कारणत्वेनाभिमतो ऽसावपि भक्त्या तीव्रतां तीव्रतरतां चोपयाति। परं सिद्धानां भक्तिर्नैव द्वैतप्रधाना, न चापि शान्त-दास्य-वात्सल्य-सख्यमाधुर्याख्यभावपञ्चकप्रधाना, अपि त्वभेदभावनाप्रधाना-ऽभेददर्शनप्रयोजना च पराभक्तिः।

उक्तमेतामधिकृत्योत्पलदेवपादैः—

ज्ञानस्य परमा भूमिर्योगस्य परमा दशा।
त्वद्भक्तिर्या विभो कथि पूर्णा मे स्यात्तदर्थिता॥

(शि. स्तो. ९-९ इति॥)

तदेषा सैद्धदर्शनदृष्टिरेवोपात्ता कविना काव्यद्वयेऽप्यत्रा-द्यन्तपर्यन्तम्।

तान्त्रिकी या शैवी शाक्ती च साधना तस्या अपि कति-पये क्रमाः ये तत्तदाचारतया प्रसिद्धास्तद्यथा-वामाचारो, दक्षिणाचारः, कौलाचारो, मताचारस्त्रिकाचार इति। तत्र लज्जा-तङ्कादिविहीनस्य पञ्च-मकारप्रयोगस्य प्राधान्यं वामाचारे। तेन च साधकानां सद्यः सिद्धयो भवन्ति। परमाचार्याभिनव-गुप्तमत्या सिद्धिजालेषु बन्धकोऽयं वामाचारः। दक्षिणाचारस्तु तन्मुक्तः परं श्मशानवास-कपाल-धारणादि-रौद्रकर्म-बहुलोऽसौ। सिद्धान्तशैवानु-यायिनां लिङ्गपूजादिसाधनामार्गे बाह्यपूजाकर्मणो बाहुल्येन ज्ञान-योगयोरप्रधानता। सैद्धे पुनः शैवमार्गे कर्मणोऽप्रधानता, मकार-सेवनेऽनुशासनबद्धता सुखोपायता च रौद्रव्रतरहितत्वेन। तत एवोक्त-माचार्याभिनव गुप्तपादैः रत्नमालागममाश्रित्य—

सिद्धान्ते कर्म बहुलं मलमायादिरूपितम् ।
दक्षिणं रौद्रकर्माढ्यं वामं सिद्धिसमाकुलम् ॥

(तं. आ. ३७-२७) इति ॥

ततः कौलमतत्रिकाद्यास्तान्त्रिकाः आचाराः श्रेष्ठाः । तत्रापि त्रिकाचारोऽतीव महिममण्डितः । तत्र मण्डल-मन्त्र-याग-होमादीनां विधिनिषेध-राहित्येन भक्तिपूर्वकं ज्ञानेन तत्त्वं सम्यगवबोधनीयम्, योगेन च साक्षादनुभवविषयतां प्रापणीयं भवति । असौ तथाविध एव साधनामार्गोऽत्र नागार्जुनकृते खण्डकाव्यद्वये तत्र तत्र बहुशो निर्दिष्टः । एवमयं शैवाचार्यो नागार्जुनोऽद्वैतशैवशास्त्रगुरुः, काश्मीरत्रिकाचारपरश्चेति विदाङ्कुर्वन्तु विद्वज्जनाः । एतत् सत्यं काव्यद्वयस्य सावधानेनाध्ययनेन स्वयं स्फुटीभवति ।

त्रिकाचारस्य मुख्या साधनप्रक्रिया शाम्भवोपाय इति । स चाकिञ्चिच्चिन्तकस्य साधकस्य निजे पारमेश्वरे स्वरूपे स्थितेरभ्यासः । स एवात्र स्पष्टं निर्दिष्टः परमार्चनत्रिंशिकायां २, ३, ४, इति संख्याकैः पद्यैः तत्र मनसोऽकिञ्चित्करत्वेन प्रशमः, संवित्प्रकाशे च तस्य निमज्जनम्-

यत्र शाम्यति मनो न निर्मलं ।
स्फीतचिज्जलधिमध्यमाश्रितम् ॥

इत्यत्र(प. अ. त्रि—२)

निर्विकल्पस्वात्मपारमेश्वरस्वरूपप्रथनाभ्यासः-

यत्र नास्ति स विकल्पनोज्झितः ।
स्फीतसौख्य-शिव-सङ्गमोत्सवः ॥

इत्यत्र (तदेव—३)

स्वत एव चित्तवृत्तीनां लयः—

मनस्येव वृत्तयः यत्र यान्ति विलयं न सर्वतः ॥

इत्यत्र (तत्त्वे ४)

सुस्पष्टं निर्दिश्यन्ते। त्रयमप्येतत्त्रिकाचारीय-शाम्भवोपाय-प्रधानाङ्गभूतम्।

काश्मीर शैवदर्शनस्य महत्त्वपूर्णैकेयं विशेषता यदत्र तथा-विधाऽऽध्यात्मिकी स्थितिरभिलष्यते यस्यां व्यवहारे प्रवर्तमानोऽपि साधकः परमार्थान्न च्यवते—तदेषा विशेषता स्पष्टं निर्दिष्टा—

इन्द्रियेषु विषयानुवर्तिषु
प्राणवर्त्मनि निजप्रवाहके।
कापि निर्वृतिमयी चिदूर्जिता
यत्र नोल्लसति किं तवर्चनम्।

(प, अ. वि.—१५)

काश्मीरशैवशास्त्रे शिवस्यानुग्रहशक्तिपात एव जीवस्य मुक्तेर्मूलकारणं यत् तदेवात्र प्रशस्तं परमार्चनत्रिंशिकायां २६ तमे पद्ये—

यद्विश्रृंखलमहोदयोल्लसत्
शक्तिपातवशतो विजृम्भते।
तत्पदं यदि गुरुप्रसादतो
लब्धमुत्तममथार्चितः शिवः॥

(प. त्रि. २६)

त्रिकाचारे आणवोपायमध्ये यद् बुद्धिध्यानं प्रतिपादितं तदितरशास्त्रेष्वलभ्यमपीह परमार्चनत्रिंशिकायास्त्रयो-विंशे पद्ये सुनिर्दिष्टं लभ्यते। तच्च पद्यमेतत्-

सोमसूर्यदहनेन्धनोद्धतः
स्फीतचिज्ज्वलनदीप्तिभास्वरः ।
दुर्निरीक्ष्यगतिरिद्धतेजसा
भाति यत्र न किमेतदर्चनम् ।

(प. त्रि. २३)

अथास्य नागार्जुनस्य काश्मीरशैव-सिद्धत्वं दृढं कर्तुं तेषां सिद्धानामस्य च कान्यपि तुल्यतात्पर्यणि वाक्यान्यत्र तुलनार्थमुद्धियन्ते-

उक्तं तावदाचार्याभिनवगुप्तपादैर्मालिनीविजयवार्तिके-

निमज्जमानमप्येतन्मनो वैषयिके रसे ।
नान्तरार्द्रत्वमभ्येति निश्छिद्रं तुम्बकं यथा ॥

(मा. वि. वा २—१०८) इति ॥

तान्त्रिकी खल्वेषोपासनप्रक्रिया यत्र विषयभोगोऽपि मोक्षसाधनतामुपयाति । तदनुसारमेवोक्तमनेन नागार्जुनेन-

दिष्टया निमग्नमपि संव्यवहारमध्ये
चेतस्तदद्य न विमुञ्चति पारिपूर्ण्यम् ॥

(चि. सं. त्रि,—१५)

आचार्योत्पलदेवानुसारं शिवयोगिनः कृते दुःखेष्वपि, सांसारिकव्यवहारेष्वपि च मोक्षलक्ष्मीरसास्वादो न हीयते ।

तदुक्तम्--

दुःखान्यपि सुखायन्ते विषमप्यमृतायते ।
मोक्षायते च संसारो यत्र मार्गः स शाङ्करः ॥

(शि. स्तो.—२०—१३) इति

एवमेव निर्दिष्टमनेन नागार्जुनेन—

दुःखैक सार इति भीम इति प्रयत्नात्
संसार एष किल यस्य बभूव हेयः ।
दिष्ट्या स एव परचिद्रस-सामरस्य-
सञ्जीवितः श्रयति तस्य विमुक्ति-साम्यम् ॥
(चि. सं. व्रि.—११) इति

चित्रं तदेतदसमं यदभूत् सुखेषु
प्राप्तेषु निर्वृतिदशामनुवर्तमानम् ।
दुःखेषु दुस्सहतरेष्वपि चित्तमद्य
पूर्णप्रमोदरसनिर्भरमेतदास्ते ॥
(तदेव २४) इति च

उत्पलदेवाचार्यो बहुधा तपो-ध्यान-प्राणायामादि-कष्ट-साधनानादरं व्यनक्ति परभक्तेरपेक्षया तद्यथा—

न योगो न तपो नार्चाक्रमः कोऽपि प्रणीयते ।
अमार्गे शिवमार्गेऽस्मिन् भक्तिरेका प्रशस्यते ॥
(शिव. स्तो—१—१८)

प्रत्याहाराद्यसंस्पष्टो विशेषोऽस्ति महानयम् ।
योगिभ्यो भक्तिभाजां यद् व्युत्थानेऽपि समाहिताः ॥
(तदेव १—१७)

अस्माकं नागार्जुनोऽप्ययं साक्षाच्छाम्भवयोगाभ्यासापेक्षया ध्यानयोगादिकलनासु लज्जते ।

यदुक्तमनेन—

यत्र नित्यपरहर्षनिर्भरश्चित्सुधारसविपानघूर्णितः ।
ध्यानयोगकलनासु लज्जते नीरसासु न किमेतदर्चनम् ॥
(प. अ. त्रि. १३) इति

क्लिष्टं यदेतदभवज्जपकष्टयोग-
प्राणप्रवाहविनिरोधकदर्थनाभिः ।
चेतस्तदद्य परमामृतसामरस्य-
सञ्जातसम्मदरसासवमत्तमास्ते ॥
(चि. सं. त्रि. ६)

आचार्यः साहिब्कौलः "शिवजीवदशके" स्वात्मानं मृत्योरपि ग्रासकर्तारं कथयति—

मृत्यु-मृंत्यु-मृंत्यु-भाजां न मृत्यु-
मृंत्युज्ञानां नैव जाता यतस्ते ॥
सोऽहं मृत्युं चाप्यमृत्युं व्यतीत्य
भासे भासा मृत्युमृत्युर्नमो मे ॥
(शि. जी. द.—५)

अथायं नागार्जुनोप्येवं विधमेव भावं प्रकटीकरोति—

विश्वसंहृतिरसैक-तत्परो
लेलिहान-रसनाकुलो यमः ।
यत्र चिच्छिखि-शिखासु हूयते
लीलयैव न किमेतदचनम् ॥
(प. अ. त्रि.—८)

काश्मीरशैवदर्शनस्य पराद्वैतदृष्ट्या पश्यन्तः शिवयोगिनः वन्धनं मोक्षं चोभयमपि समानतया शिवैश्वर्यमयमेव पश्यन्तः न कमपि वास्तविकं भेदं तयोः कलयन्ति। तदुक्तमाचार्याभिनवगुप्तपादैर्बोधपञ्चदशिकायाम्—

एतौ बन्धविमोक्षौ च परमेशस्वरूपतः ।
न भिद्येते न भेदो हि तत्त्वतः परमेश्वरे ॥

(बो. प. द.—१४)

तन्त्रालोकेऽपि च—

अस्यां भूमौ सुखं दुःखं बन्धो मोक्षश्चितिर्जडः ।
घटकुम्भवदेकार्थाः शब्दास्तेऽप्येकमेव च ॥

(तं. आ.—२—१६)

अनयैव काश्मीरशैवशास्त्रस्य पराद्वैतदृष्ट्या पश्यन्नयं नागार्जुनोप्याह—

यत्पवस्थितिजुषो महाजनाः
मुक्ति-संसृति-समान-बुद्धयः ॥

(इति प. अ. त्रि.—२४)

अनुत्तराष्टिकायामाचार्याभिनवगुप्तस्त्यागोपादानराहित्येन स्वस्थितेरभ्यासमुपदिदेश—तद्यथा—

न त्यागी न परिग्रही भज सुखं स्वस्थो यथावस्थितः ॥ इति

(अ. अ.—१)

मा किञ्चित् त्यज मा गृहाण विरम स्वस्थो यथावस्थितः ॥ इति

(तदेव—२)

एवं विधामेव दृष्टिमाश्रित्योक्तमनेन नागार्जुनेनापि—

किञ्चनापि न विमुच्यते क्वचित्
किञ्चनापि न च गृह्यते क्वचित् ।
स्वं वपुर्विमलबोध-निर्भरं
दृश्यते यदि तदाचितः शिवः ॥

(इति प. अ. त्रि.—२८)

सिद्धान्तपक्षे साधनापक्षे चैवंप्रायाः अस्य सिद्धस्य विचारा एतदेव स्थापयन्ति यदयं काश्मीरशैवदर्शनाभ्यासी गुरुरिति । परमार्चनत्रिशिकायामेकैकत्रापि पद्ये शिवार्चाया एवोल्लेखः । न चासावर्चा बाह्यसाधनसाध्या । अपि त्वान्तरी शाम्भवयोगात्मिका परा पूजा यस्याः प्रशंसा "शिवस्तोत्रावल्यां" बहुषु स्थानेषु कृताऽनेकत्र च यस्याः स्वरूपमपि तत्र व्याख्यातमाचार्योत्पलदेवपादैः ।

स्तोत्रद्वयस्य शारदापीठ सीरीज पत्रिकायां मुद्रिते प्रथमे संस्करणे सम्पादकमहोदयेनोपोद्घातपृष्ठेषूक्तं "यन्माध्यमिको बौद्धाचार्यः कश्मीरानागत्यात्र स्थित्वा शैवीं दीक्षां लब्धवान् । तत्साधनायाः साफल्ये सम्पन्ने का व्यद्वयमेतद्रचितवानिति ।" अत्र तावदुच्यते-माध्यमिकस्तावदाचार्योऽतीव पुरातनो गुरुः । यस्मिन् कालेऽसौ जीवति स्म तस्मिन् काले परार्द्वैतसिद्धान्तप्रधानं शैवदर्शनशास्त्रं शाम्भवोपायप्रधाना च त्रिकाचारसाधनेत्युभयमपि लोके लुप्तप्रायमेवाभूत् । कतिपयशताब्दीषु व्यतीतास्वेव भगवद्दुर्वाससोऽनुग्रहात् त्र्यम्बकादित्येन शास्त्रमेतत् पुनः प्रवर्तितं लोके । ततोऽपि कतिपयशतवर्षानन्तरं त्र्यम्बकादित्यशिष्यपरम्परायां यः षोडशो गुरुरभूत् सङ्गभादित्याख्योऽसावष्टमे शतके कश्मीरानागत्यात्रैवोपनिविष्टवान् । तदनन्तरमेव काश्मीरशैवदर्शनसम्बन्धिनो वाङ्मयस्य विकासः कश्चन समभवत् । नवमे च शतके तस्य वाङ्मयस्य सुशोभना प्रवृद्धिरभवत् । दशमे शतके आचार्याभिनवगुप्तपादानां सत्प्रयत्नैः शास्त्रमेतत् परिपूर्णं विकासमाप्तवद् वाङ्मयविषये सिद्धान्तपक्षे प्रयोगपक्षेऽपि च । तदनन्तरमत्र वाङ्मये

विकारस्यापि कश्चन प्रवेशः समभवदित्येषोऽस्य संक्षिप्त इतिहासः ।

तेन प्रथमशताब्दीकस्य माध्यमिकाचार्यस्य त्रिकशास्त्रदीक्षा, त्रिकयोगाभ्यासः, त्रिंशिकाद्वयस्यास्य निर्माणमिति त्रयमपि निराधार-कल्पनाकल्पितमेव भाति । यथा च पूर्वमुक्तमस्ति चेदयमाचार्यः पुरातनकालीनोऽभविष्यत् तदोत्पलवैष्णवेन वा, जयरथेन वाऽस्य त्रिंशिकाभ्यामवश्यमेव किञ्चित् किञ्चिद् बहुशः समुद्धृतमभविष्य-न्निजेषु वैदुष्यपूर्णेषु ग्रन्थेषु टीकासु च। महेश्वरानन्दात् प्राक्तनेन केनापि ग्रन्थकृता टीकाकृता वा त्रिंशिकाद्वयमेतन्मनागपि नैव स्पृष्टम् । न चैतत् समभविष्यत्, अस्य त्रिंशिकाद्वयस्यातीव स्पृहणी-यत्वात् । ततो नायं नागार्जुनो माध्यमिको बौद्धाचार्यो, नापि वज्र-यानीयो गुरुरपितु कश्चनातीव प्रौढस्त्रिकदर्शनोपासको बहु-श्रुतो विद्वान् महेश्वरानन्दात् प्राग् जयरथाच्चानन्तरं प्रादुरभूद् इति । अस्य च प्रादुर्भावस्थानं काङ्कड़ामण्डलम्, निवासस्थानञ्च तत्रत्यं सिद्धनागार्जुनस्थानमिति पुनः स्मार्यते ।

परमार्चन त्रिंशिकायाः श्लोकानुक्रमणी

संख्या	श्लोकः	क्रमाङ्कः	पृष्ठाङ्कः
१.	अनवच्छिन्नचिद्व्योम	३१	७३
२.	अप्रयत्नमनिकेतनम्	४	३८
३.	आत्मनात्मनि	२४	६३
४.	आसादितं गुरुमुखात्	३०	३०
५.	इन्द्रियेषु विषयानु	१५	५२
६.	किञ्चनापि नविमुच्यते	२८	६९
७.	किन्तदर्चनमनल्प	३	३७
८.	खेचरीप्रभृति	६	४१
९.	चिन्नभःसरसि	१९	१९
१०.	दिव्यखेचरदृशा	१६	५३
११.	निर्निकेतनिरूपा	१२	४८
१२.	निर्विकारमजरं	२०	५८
१३.	बालिकारचित	२	३६
१४.	भावसञ्चय	२७	६८
१५.	भैरवा विविध	२९	७०
१६.	मन्यते न कृत	१८	५५
१७.	मानमेयमिति	१०	४६
१८.	यत्र नित्यपरहर्ष	१३	५०
१९.	यत्र वर्षति न	५	३९
२०.	यत्र साहससमाधि	७	४२
२१.	यद्यदापतति	२५	६४
२२.	यद् विशृङ्खल	२६	६४

२३.	विश्वसंहृति	८	४४
२४.	व्योमकल्पम्	११	४७
२५.	शक्तिचक्रपरमादि	२२	५९
२६.	शक्तिविस्तर	१४	५१
२७.	शान्तवीचि	२१	५९
२८.	शान्तिमेति	१७	५५
२९.	सोमसूर्यदहन्	२३	६२
३०.	स्तब्धमन्थर	९	४५
३१.	स्नानपूजन	१	३४

चित्तसन्तोषत्रिंशिकायाः श्लोकानुक्रमणी

संख्या	श्लोकः	क्रमांकः	पृष्ठांकः
१.	आपृच्छ्यताम्	२२	१००
२.	कन्दर्पबाणविषमम्	५	८०
३.	कस्योर्जितस्य	२३	९१
४.	किं ब्रूमहेऽत्रभवते	२३	१०१
५.	क्लिष्टं यदेतदभवत्	६	८२
६.	चित्रं यदेतदसमम्	२४	१०३
७.	चिन्तां ततान	१८	९६
८.	चिन्ताशताकुलतरं	२०	९८
९.	तृष्णाकराल	१२	९०
१०.	ते कारणाधिपतयः	२६	१०५
११.	दिष्ट्या भवानल	२	७७
१२.	दुःखैकसार इति	११	८९
१३.	ध्यानेऽर्चनेऽपि	१५	९३
१४.	नित्यं यदेतदभवत्	१९	९७
१५.	निरावरणचिद्व्योम	३१	१११
१६.	भवमरुभुविश्रान्तो	३०	११०
१७.	यत्नेन वाञ्छिम्	९	८५
१८.	योगव्रतादिनियमैः	१०	८७
१९.	यो भेदतीव्रशिशिर	७	८३
२०.	यैरिन्द्रियैरति	१७	९५
२१.	लोकोत्तरानुभव	१	७६
२२.	वन्दामहे किमु	२१	९९

२३.	वर्तामहे क्वचन	१४	९२
२४.	विधुद् विलास	२७	१०६
२५.	विश्वं निगीर्य	२५	१०४
२६.	त्यक्तस्वतन्त्र	८	८४
२७.	व्यामूढ मन्दमिव	३	७८
२८.	सङ्कोचमाश्रितवतो	४	७९
२९.	सर्वेषु चित्तमधुपो	१६	९४
३०.	स्वच्छन्दनिर्मल	२९	१०८
३१.	स्वस्त्यस्तु ते	२८	१०७

ग्रन्थ संकेत सूचिः

संकेतः	ग्रन्थः	विशेषः
अनु. अ.	अनुत्तराष्टिका	अभिनवगुप्तस्य
आ.	आगमः	
ई. प्र.	ईश्वरप्रत्यभिज्ञा	उत्पलदेवस्य
बो. पं. द.	बोधपञ्चदशिका	अभिनवगुप्तस्य
भै. स्तो.	भैरवस्तोत्रम्	,,
म. न. प्र.	महानयप्रकाशः	शितिकण्ठस्य
मा. वि. तं.	मालिनीविजयोत्तरंतन्त्रम्	आगमः
मा. वि. वा.	मालिनीविजयवार्तिकम्	अभिनवगुप्तस्य
रा. त.	राजतरङ्गिणी	कल्हणस्य
वि. भै.	विज्ञानभैरवः	आगमः
शि. जी. द.	शिवजीवदशकम्	साहिबकौलस्य
शि. सू.	शिवसूत्रम्	आगमः
शि. स्तो-	शिवस्तोत्रावलिः	उत्पलदेवस्य
श्री. रा.	श्रीराजिका	कस्यापि
स्पं. का.	स्पन्दकारिका	भटटकल्लटस्य

शुद्धिपत्रम्

शुद्धिपत्रम्

पृष्ठं	पंक्ति:	अशुद्ध: पाठ:	शुद्ध: पाठ:
15	8	themseives	themselves
16	13	sarads peetha	sarada peetha
18	19	गाचरतां	गोचरताम्
23	14	मपक्षेया	मपेक्षया
25	15	पाठस्य	पीठस्य
25	18	नाथस्थ	नाथस्य
28	1	या:	ये
29	5	एतत	एतत्
29	16	लिप्यत्तरा	लिप्यन्तरा
32	10	सन्निकर्व	सन्निकर्ष
32	18	कपूमीर	कश्मीर
33	18	खदेम	खेदं
33	20	चर्वमा	चर्वणा
35	19	शिवात्मक	शिवात्मकं
37	16	उभेदभाव	अभेद भाव
41	12	सर्वगयां	सर्वगताम्
41	12	मन्त्र-	मत्र-
43	19	हूण्यते	हूयते
49	17	१-२	१-२०
49	20	स्मयवान	स्मयमान
53	5	स्थातुं	स्थापयितुं
54	3	सस्कार	संस्कार

पृष्ठं	पंक्तिः	अशुद्धः पाठः	शुद्धः पाठः
59	12	लयं	लय
61	14	तत्वस्य	तत्त्वस्य
65	4	जसी	जैसी
69	6	षटत्रिंशत्	षट्त्रिंशत्
80	10	प्रेमेय	प्रमेय
83	7	अस्वादः	आस्वादः
84	7	मन्त्रः	मत्रः
88	14	तयाविधं	तथाविधम्
88	15	चतासि	चेतसि
90	4	२-१२	२०-१२
91	10	२३	१३
92	3	चिन्तया	चित्तया
100	3	पुनरूक्तिः	पुनरुक्तिः
101	6	भ्रामयन्यभूत्	भ्रामयन्त्यभूत्
102	5	चिन्त	चित्त
102	14	नाश्रिश्रत	नाश्रित
104	12	काल	काल-
104	15	निरूपमस्य	निरुपमस्य
105	12	ब्रह्मद्याः	ब्रह्माद्याः
109	10	व्याख्यापते	व्याख्यायते
109	16	दिष्टया	दिष्टया या दिष्ट्या
110	10	निमज्जति	निमज्जति साम्प्रतम्
112	2	खण्डकाव्य	खण्ड काव्य

श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठस्य

प्रकाशनानि

सं.	प्रकाशनम्	सं. लि.	मूल्यम्
१.	काश्मीर शैवदर्शन	डा० बलजिन्नाथ पण्डित	३०—००
२.	विक्रमाङ्कदेवचरितस्य साहित्यिकं सर्वेक्षणम्	डा० प्रियतमचन्द्र शास्त्री	३०—००
३.	जैन जीवन दर्शन की पृष्ठभूमि	डा० दयानन्द भार्गव	२०—००
४.	ऋचा रहस्यम्	,, ,, ,,	२०—००
५.	ग्रह लाघवम् (पहला भाग)	डा० रामचन्द्रपाण्डेयः	१२—५०
६.	न्यायसारविचारः	डा० उमारमण झा	२१—००
७.	दशपदार्थी	डा० उमारमण झा	१३—५०
८.	ग्रहलाघवम् (दूसरा भाग)	डा० रामचन्द्रपाण्डेयः	२०—८०
९.	ज्योतिषरत्नमाला	श्री विहारी लाल शास्त्री	३६—२५
१०.	रघुनाथगुणोदयः	डा० गङ्गादत्तविनोदः	२७—१५
११.	ललितास्तवरत्नम्	भगवद्दुर्वाससः कृतम् डा० बलजिन्नाथकृतटीका युत्म्	१३—५०
१२.	परमार्थसारः	डा० द्वारिकानाथ शास्त्री कृता संस्कृत टीका	१५—३५
१३.	स्वातन्त्र्यदर्पणः	डा० बलजिन्नाथ विरचितः संस्कृतटीकासहितः	२४— ००
१४.	भृङ्गीशसंहिता	डा० यशपाल खजूरिया सम्पादिता	१३२—८०
१५.	समरसार	श्री विहारी लाल शास्त्री सम्पादितो व्याख्यानश्च	२८ ४५
१६.	भास्करीय बीजगणितम्	,,	३६—९५
१७.	शैवाचार्यो नागार्जुनः	डा० बलजिन्नाथ पण्डितः	
१८.	तर्क प्रवेशः	डा० उमारमण झा	